तस्योपाधेरपि पक्षवृत्तितया न व्यतिरेकस्य स्वरूपासिद्धत्वे बाधाद्यनुपपादकत्वादित्यर्थः॥ ननु साध्यस्वरूप
रूपाधावुक्तलक्षणमव्यापकं तस्य स्वाव्यावर्तकत्वादित्यत आह॥ साध्ये चेति॥ तथा च व्यभिचारोऽन्वयेन पक्षे सा
ध्याविशिष्टत्वाद्यथास्य न संग्राह्यत्वं तथा तत्त्व एवात्रापीति भावः॥ यद्यपि अयं साध्यव्यभिचारी साध्यव्या
पकव्यभिचारित्वादित्यत्रोपाधिर्न दान्न साध्याविशिष्टं तथापि साध्यवद्धेतोरपि संदिग्धत्वेन साध्याविशिष्टं
व[illegible] स्कतरस्कसाध्यव्यापकत्वेज्ञानस्य विपक्षबाधकत्वेन व्यभिचारानुमानप्रयोजकत्वात्॥ उपाधिव्यभि

वारित्वमेव तत्र हेतुरित्युक्तं ॥ एवं साध्यावैशिष्ट्यमिति भावः ॥ अनुमितीति ॥ अत्रेदं चिंत्यं ॥ सद्धेतौ साध्यस्य
साधनाव्यापकत्वाभावादेवानुपाधित्वमिति कथमनुमितिमात्रोच्छेदः ॥ नव्यानंतरोक्तसाधनव्यापकोपाधि
वादिमतइति वाच्यं ॥ तन्मतेपि यत्र पक्षावृत्तिहेतुस्तत्रैव तस्य तथात्वेन पक्षवृत्तिहेतौ साध्यस्यानुपाधितया
अनुमितिमात्रोच्छेदासंभवादिति ॥ प्रसंगादाह ॥ सचेति ॥ कश्चिदत्रोपाधिरस्ति न वेत्याकारो न संदिग्धो
पाधिस्तस्य त्रांकापि ग्राह्यत्वेनाप्रतिबंधकत्वादित्यन्यथैवाह ॥ यत्रेति ॥ अर्थांतरमित्यापाततः परमार्थ
तस्तु उभयसाधने प्रत्येकमुपाधिस्यादेवेति दूषणं द्रष्टव्यं ॥ तृतीयं संदिग्धोपाधिमुदाहरति ॥ यथाव
त्राकेति ॥ संदिग्धेति ॥ दूषणमात्रे दृष्टांतोयं ॥ यद्यपि संदिग्धोपाधिना साध्याभाववति साधनसंदेहो नाधे
यः ॥ किंतु साधनवत्येव पक्षे पक्षसमे वा स्वव्यावृत्तिसंदेहेन साध्याभावसंदेहः ॥ सव्यभिचारसंदेहतयान
दोषः ॥ अनुमानमात्रोच्छेदापत्तेः ॥ तथापि तदुच्छेद क्रियास्वारसवादिनस्तस्याप्रतिबंधकत्वेपि अन्य हित
स्य तस्यापि प्रतिबंधकत्वमेव फलबलत्वात् ॥ अतएव ह्निस्त्यादिकेदिकर्तृकमित्यादावप्रयोजकतया हि

॥७२॥

ता ५

तस्माद्दृष्टोपि प्रतिबंधक एवेति भावः॥ यद्वा उपाध्याहितसंदेहे न हेतावुत्कटकोटिव्यभिचारसंशय आधीयत इ
ति फलातस्य प्रतिबंधकत्वं॥ यद्युपाधिसंदेहः स्वरूपसन्नेव प्रतिबंधको न ज्ञातः परं प्रति च तदुद्भावनं त
ज्ज्ञापकं ननु तदुत्पादकमिति किंचित्करं तथापि संदेहः ज्ञा नमुखेन पराभिमतव्याप्तौ साधकमानाभावद
र्शनेन परं तदिति परस्य तत्र साधकाभावमापादयन् तत्संशयमापादयतीति स प्रयोजनमित्याहुः॥ तुल्यमेवे
ति॥ ज्ञातमिति शेषः॥ इष्टापत्तिमाशंक्य दूषणांतरमाह॥ संदिग्धोपाधेरिति॥ तद्व्यतिरेकस्येति॥ एतद्वपक्षे
साध्येनाव्यापकतासंदेहे न यः संदिग्धोपाधिस्तदभिप्रायेणेदमुक्तं॥ व्यतिकेरेति॥ ननु तद्व्यतिरेकेनासाधा
रण्यं॥ बाधदशायां सपक्षीभूते पक्ष एव तस्य वृत्तेः॥ न च यत्र पक्षे स्वस्य साध्याभावनिश्चयाभावे सव्या
प्तिवाक्यादिना पक्षेतरत्वस्योपाधित्वनिश्चयस्तदभिप्रायेणेदमिति वाच्यं॥ तत्रापि व्यतिरेकिणा सत्प्रतिपक्षसं
भवात्॥ न चासाधारणं तस्यापि सत्प्रतिपक्षोत्थापकतया दोषत्वादिति परितोषादाह॥ पक्षेतरेति॥ पक्षेत
रत्वज्ञानदशायामुपाधेर्दूषणत्वं न स्यादिति भावः॥ स्वत इति॥ यद्यप्युपाधिज्ञानस्य स्वतः प्रतिबंधकत्वं नाशंकि

अन्यथा साध्यव्यापकतासंदेहपक्षे इदं यदिदं तदा पक्षे साधनाव्यापकतानिश्चये येन उपाधिव्यतिरेकस्य साध्याभावसाधकत्वं स्यादेवेति उ
पाधिर्दूषणं स्यादेवेति भावः॥ ८

८५

३॥

तत्किं त्वनौपाधिकत्वज्ञानविघटकत्वं॥ तथाप्यनौपाधिकत्वज्ञानमेव न व्याप्तिधीकारणमित्युक्तमिति भावः॥ त
र्हि व्यभिचारज्ञानद्वारेणास्य दूषणत्वमस्त्वित्याशंक्याह॥ नापीति तस्मादुपाधेरिति॥ यद्यपि ज्ञायमानतया
प्रतिबंधकत्वाभावाद्धेत्वाभासत्वशंका नास्त्येव॥ तथाप्युपाधिदोषत्ववादिना केनापि रूपेणास्य दोषत्वे वक्तव्य
व्ये अनुमित्यसाधारणदोषत्वमेव आभासत्वं वाच्यमिति भावः॥ व्यभिचारोन्नायकत्वेनैवास्य दूषणत्वमि
ति॥ व्यभिसंधाय पूर्वोक्तदोषं निरस्यन्नाह॥ आद्ये घनेति॥ विरुद्धचिंतनमिति॥ निश्चितोपाधिदूषकतापि प्रायेण
दृ॥ तस्मादुपाधेर्निश्चयादिति॥ उपाधेर्निश्चयादौ चित्यावर्जितोमान सो व्यभिचारनिश्चय इत्यर्थः॥ व्याप्ति
विरहेति॥ तदनुमापकतयेत्यर्थः॥ यद्यपीदं दूषकताबीजं आकाशादिव्यत्वाव्याप्यं तद्व्यापक गुणत्वाव्याप्यत्वा
दिति न्याये न गुणत्वादावप्यस्ति॥ न च तस्योपाधित्वमेव॥ लक्ष्यतावच्छेदकासंग्रहीतत्वात्॥ आकाशत्वन्नि
ष्ठात्यंताभावप्रतियोगित्वरूपसाधनाव्यापकत्वाभावेन लक्षणासंग्रहीतत्वाच्च॥ तथापि दूषकताबीजस्या
तिप्रसंगस्यादोषत्वमेव॥ अत एवाप्र यो त्वादेरपि व्यभिचारान्नुन्नायकत्वं॥ दोषत्वे वास्य व्यभिचारित्वे

जक

॥७३॥

व्याप्तिविरहोन्नायकत्वं तद्भिन्नमिति भावः॥ यद्वोपाधिनास्वव्यभिचारित्वेन साधनेस्साध्याव्यभिचारित्वम
मनुमेयमेवेत्याह॥ यद्वेति॥ एतच्चयत्रव्यभिचारोपधिकरणासन्निकर्षाद्यभावादयोग्यस्तत्र बोद्धव्यं॥ अन्य
थोपाधिव्यभिचारित्वरूपविशेषदर्शनजन्यव्यभिचारप्रत्यक्षमेव विवक्षितं॥ करादिदर्शनजन्यपुरुषप्रत्य
क्षेव समानेविषये प्रत्यक्षसामग्र्याबलवत्त्वात्॥ न च यत्रापि व्यभिचारानुमितिस्तत्रापितज्जनकपरामर्श
स्य व्याप्तिधीप्रतिबंधकत्वे सभवति न तस्याः प्रतिबंधकत्वमिति वाच्यं॥ प्रत्यक्षेण व्याप्तिग्रहे विरोधिव्याप्यबुद्धेर
प्रतिबंधकत्वात्॥ अनुमानेन तु तद्ग्रहे सत्प्रतिपक्षतया तत्रप्रतिबंधकत्वस्येष्टत्वात्॥ न च व्याप्त्यभावानुमितिरपि
प्रत्यक्षाप्रतिबंधकत्वमिति वाच्यं॥ प्रत्यक्षसामान्ये तथाभावेपि व्याप्तिप्रत्यक्षसाधारण्येनानुमित्यादिसाधारण
व्यभिचारज्ञानसामान्यस्यैव प्रतिबंधककल्पनात्॥ कथमन्यथा प्रत्यक्षान्नरप्रतिबंधकत्वेपि ग्राह्याभावसंदे
हात्मनो व्यभिचारसंदेहस्य व्याप्तिधीप्रतिबंधकत्वमिति भावः॥ व्याप्तिविरहाद्यनुमानद्वयेप्युपाधिमोत्रं व्यनिरा
करोति॥ न चेति॥ साधनेति॥ वह्निर्धूमव्यभिचारि आर्द्रेंधनव्यभिचारित्वात् इत्यादौ वह्न्यभावद्वित्वादिकमुपा

65

चारित्यर्थः॥ यद्यप्येतदयोगोलकत्वादौ साध्याव्यापकं तथापि व्यभिचारास्फुरणदशायामेवोपाध्युपन्या
सेन तदानीमुपाधित्वभ्रमाद्व्यभिचारानुमितिप्रतिबंधः स्यादिति भावः॥ उपाधीति॥ तथा न दुष्टेदापत्तिच्छेदे
ण प्रतिकूलतर्केण तस्य साध्याव्यापकत्वनिर्णयान्नोक्तदोष इति भावः॥ ननु नोपाधिमात्रोच्छेदः॥ प्रमेय
ब त्वादौ व्यभिचारिणि साधनेतदभाववद्वृत्तित्वस्योपाधेरसंभवात् साधनाद्यसिद्धेरित्यनुशयेनाह॥ अदृष्टेति॥
अ च व्यभिचारास्फुरणदशायामपि तस्याव्यापकत्वं सुगममेवेति भावः॥ एतच्च व्याप्तिविरहोऽनुमानाभिप्रा
येणोक्तमिति ध्येयं॥ दृष्टेति॥ घटितव्यभिचारस्यादृष्टत्वासंभवेन तत्साध्ये साध्याव्यापकत्वासंभवात्॥ यत्तु भ
यको दूषकस्यापकतावच्छेदकरूपवत्त्वलक्षणो व्यभिचारोऽत्र साध्यः॥ स च सपक्षविपक्षव्यावृत्तत्वमादाय गग
दावस्स्यैवेति॥ तन्न॥ अनुमितिप्रतिबंधकत्वार्थं वह्निव्यभिचारानुमाने॥ न च तस्य ज्ञानमनुमितिप्रतिबंधकं॥ अ
विरोधिविषयत्वात् किंतु [illegible] विपक्षगामित्वादिज्ञानमेव तथेति॥ ननु दृष्टिमत्त्वपक्षधर्मावच्छिन्नसाध्यव्यापकं
त्वान्नोक्तदोष इत्यपरितोषादाह॥ संयोगादाविति॥ संयोगविशेषादावित्यर्थः॥ तथा च संयोगविशेषादा
युः प्रत्यक्ष इत्यत्र संयोगविशेषः॥ प्रत्यक्षत्वव्यभिचारितद्व्यापकव्यभिचारित्वादित्यनुमानेन संयोगविशेष

प्रति४

॥७४॥

भावववद्वृत्तित्वतद्व्यापकव्यभिचारित्वादिरूपसाधनव्यापकत्वान्नोपाधिरित्यर्थः॥ उपाधिवदवभासमानाना
नुपाधित्वे ज्ञानाधीनज्ञानत्वादाह॥ अथेति॥ व्यभिचाराद्यनुन्नयनदशायां सत्प्रतिपक्षो व्यापनेऽनुमितिप्रतिबं
धात्तद्व्यापनद्वारास्य दूषकत्वमेव॥ दूषितस्यानियमपक्षादित्यपि प्रत्योषाधेः सत्प्रतिपक्षो व्यापकतापसमाख्येवत
दाभासानाह॥ असाधारणेति॥ केवलान्वयिनि सपक्षस्य केवलव्यतिरेकिणि विपक्षस्य व्यतिरेकेऽसंभवा
दसाधारण्यासंभवादित्यत आह॥ अन्वयव्यतिरेकिणीति॥ पक्षाव्यावर्त्तकेति॥ पक्षव्यापकविपर्यय इत्यर्थः॥ पू
र्वसाधनतायद्इति॥ अत्र पूर्वसाधने व्यतिरेकित्वं नोपाधिता [illegible] प्रयोजकमिति तात्पर्यात्साध्यव्यापकताग्रहे सति
तादृशस्याप्यनन्यत्वादेरुपाधित्वस्वीकारादिति॥ नचेति॥ समीचीनप्रतिपक्षोच्छेदः द्वितीयस्य प्र[illegible]तिपक्षस्य
सोपाधित्वनियमइति यावत्॥ ननु सत्प्रतिपक्षहेत्वाभासोच्छेद इत्यर्थः॥ सत्यपि तस्योपाधित्वे दतत्प्रतिसंधानेन
दशाविशेषे त दोषत्वसंभवात्॥ किंच यथाश्रुते यत्रैवोपाधेः साध्याव्यापकत्वं तत्रैव स्थापनाया व्यभिचारे
साध्याव्यापकत्वग्रहे उपाधिना तद्ग्रहत्वाद्व्यभिचारेण॥ उभयथाविशेषादर्शनसंभवे सत्प्रतिपक्षासंभवादग्रिम
ग्रंथविरोधः॥ तथा च तथोक्तमेवमनोरमं॥ आभासत्वमिति॥ व्यभिचारेणेति शेषः॥ नत एवेति॥ अभासताप्र

६८

योऽकव्यभिचारादित्यर्थः॥ नित्यत्वादिरिति॥ यद्यपि नित्यत्वं तत्र सदुपाधिरेव॥ नप्रागभावे साध्याव्यापकत्वात् नत

था॥ भावत्वरूपपक्षधर्मावच्छिन्नसाध्यव्यापकत्वात् तथापि तत्वं नोपाधित्वप्रयोजकं। वक्ष्यमाणव्यवस्थानुपपत्तिरेव॥

किंतु साध्यव्यापकताग्रहानुकूलतर्कादिसत्वं तदसत्वे भासत्वमित्यत्र तात्पर्यमिति॥ साध्यव्यापकताग्राहका

भावादुपाध्याभासत्वमुक्तं साधनाव्यापकत्वग्राहकाभावोऽत्रोदाहृ॥ एवमिति॥ अवसरसंगत्याह॥

व्याप्तीति॥ छ॥ छ॥ व्याप्तिनि॰ रूपणानंतरमित्यर्थः॥ पक्षत्वे निरूपिते तद्धर्मत्वं सुनिरूपणमिति तन्निरूपयति

तत्रेति॥ संदिग्धेति॥ केवलान्वयिन्यपि संदेहस्याग्रेऽपपादयितादित्यर्थः॥ अव्यावर्त्तकत्वेति॥ अतीतस्याप्युपल

लक्षणत्वेन तोद्देशसंशयविषयत्वात् साध्यस्य सिद्धसाधनेऽपि पक्षतास्यादित्यर्थः॥ व्यासज्यप्रतियोगिकाभावोपि

प्रायेणाह॥ उभयेति॥ केवलान्वयिनि बाधकाप्रसिद्धिश्चेत्यपि द्रष्टव्यं॥ नन्वेवमस्त्वित्यत आह॥ नापीति॥ ननु शब्द

तिरिक्तत्वे साधके विशेषणमित्यत आह॥ प्रत्यक्षेति॥ सजातीयत्वं तत्र विशेषणमात्रमंत्याह॥ एकेति॥ संदेहवदिति॥ ने

चेश्वरसिसाधयिषामादायतत्रापि तत्सत्वमस्त्येवेति वाच्यं॥ व्य॰ धिकरणसिसाधयिषामादाय सिद्धसाधनस्थलेऽ

पिपक्षतापत्त्या सिद्धिसमानाधिकरणसिसाधयिषायाएव विवक्षणीयत्वात्॥ न च तद्वारणाय स्वत्र नत्वमेव विवक्षितं

यत्र साध्यस्ययादृशसंबंधावगाहिनिर्णयनिर्वयःसंशयस्तत्र तादृशसंबंधेन साध्यानुमितोपक्षतेत्यर्थः॥

॥७५॥

तत्रेश्वरस्याधारणमिति वाच्यं॥ तदपि हि न सिसाधयिषात्वेन ग्राह्यमतिप्रसंगात्॥ किंतु सिद्धिसमानाधिकरणसिषाध
यिषात्वेनैव एवं चावश्यकत्वात्प्रथमोपस्थितत्वाच्च तदेवास्तु॥ किंचैवं॥ सिद्धसाधनोच्छेदः॥ भगवदिच्छायास्तत्रापि स
त्वात्॥ न च तत्र तत्सत्वेपि न तस्याः सिसाधयिषात्वं तथात्वे सिद्धिसामग्रीसाहित्यमेव सिसृक्षादिवत्तस्यास्तथात्वमिति वा
च्यं॥ एवं हि तत्र तत्सामग्र्यभावे सिषाधयिषाविरहस्तदभावे च तत्सामग्री विरह इत्यन्योन्याश्रयात्॥ योग्यतायाश्च
त्वे॥ तदवच्छेदकरूपापरिचयादिति भावः॥ सिषाधयिषाविरहसहकृतेति॥ अत्र च साधकमानपदं सिद्धिपरं तेन
लौकिकसिद्ध्यभाव एव पक्षता॥ न चैवं संशयोत्तरप्रत्यक्षस्थलेपि पक्षतासत्वेऽनुमित्यापत्तिः॥ समानविषये
सिसाधयिषाविरहसहकृतप्रत्यक्षसामग्र्या अपि तत्प्रतिबंधकत्वेन तत एव तदनुत्पत्तेरित्युक्तमनुमितिलक्षण
व्याख्यानावसरे तत्रैवानुसंधेयं॥ ननु संदेहवत्परामर्षपूर्वं सिषाधयिषाया [illegible]भावादिति स्वयमेवोक्तत्वात्तदा
तत्संयुक्ता कथं पक्षता॥ तदुपलक्षणं पक्षस्य तद्वदेवातिप्रसक्तत्वादिति चेत्॥ ॥ छ॥ छ॥ ॥ अत्र वदंति॥ ॥ ॥ परामर्षोत्पा
दानंतरं स्वकारणादनुमित्सोत्पत्तौ तदुत्तरक्षण एव पुनः स्मरणलक्षणः परामर्षः तदुत्तरक्षण एव वानुमितिर्विनश्य
दवस्थानुमित्साप्रयुक्तास्ति तत्र तदानीं निर्विघ्नैर्वा यद्वा प्रथमं तत्रानुमितौ स्वसाधनतायाः प्रकृतव्याख्या

अप्पर

देश्यसमवहितक्षणेन रूपमेकं स्मरणं॥ तदुत्तरक्षण एवानुमित्सा तदुत्तरक्षण एव विनश्यदवस्थव्याप्यादिस्मरण
सात्त्विव्यानुमानेषु परामर्शः॥ तदुत्तरक्षण एव चानुमितिरित्यतोपि सा तदा तत्र सुलभेति॥ यदा तु कथं विस्मर
णादिरूपपरामर्शानन्तरं अनुमित्सोत्पद्यते॥ ततो विनश्यदवस्थपरामर्शादनुमितिः स्यात् तदा विनश्यदवस्थयोः पू
र्वसत्त्वाच्चानुमितित्वं नन्तरं तदनुमित्सायास्तत्परामर्शात्पुनरनुमित्यनन्तरं मा भूदिति स्वविषयानुपहिता सा सि
साधयिषापदेन विवक्षितेति द्रष्टव्यं॥ ॥अन्ये तु॥ द्वित्रिक्षणोत्तरितायामपि सिसाधयिषायामनुमितेरनुत्पद्यमान
त्वात् सिसाधयिषापदेन स्वोत्पत्त्युत्तरकालीनस्वविषयसिद्ध्यनुत्पादकाल एवात्र विवक्षितः॥ न चैवं सति सिसा
धयिषायां व्यासंगादिना सिद्ध्यनुत्पादे मासाद्यनन्तरं प्रत्यक्षीकृतेपि विषये पक्षतासत्वेनानुमित्यापत्तिरिति वाच्यं॥
सिद्ध्यननुगुणानन्तरितत्वेनानुत्पादकालस्य विशेषणीयत्वात्॥ लिंगदर्शनव्याप्त्यादिस्मरणव्यवहितद्वित्रिक्षणो
त्तरितायां सिसाधयिषायामेतदस्त्येवेति तत्रानुमितिः॥ मासाद्यनन्तरं च नानुमितिः॥ तत्र सिसाधयिषायाः बहुभि
रुदासीनैरन्तरितत्वादित्याहुः॥ अत्रेदं विभाव्यं॥ एवं यत्रानुमित्सानन्तरं सिद्ध्यननुगुणविषयान्तरसंचारस्तदव्य
वहितोत्तरक्षण एव स्मरणात्मकः परामर्शः तत्रानुमितिर्न स्यात्॥ न चेष्टापत्तिः॥ परामर्शाव्यवहितपूर्वसमये

॥७६॥

विनश्यदवस्थानुमित्सासत्वेनैकक्षणान्तरितायां तस्यामनुमित्यनुत्पादो लिङ्गदर्शनादिना द्वित्रिक्षणान्तरितायां
तस्यामनुमित्युत्पाद इत्यत्र मानाभावात्॥ स्वाव्यापारीभूतेन व्यवधानस्य तुल्यत्वात्॥ तस्माद्यदि व्यवहिताया
मपि सिषाधयिषायामनुमित्युत्पादोभ्युपेयते॥ तदा यावत्क्षणानन्तरमनुमित्यभावस्तत्र यावादिसिद्ध [illegible] स्ता
वत्क्षणान्तरितत्वेनाप्यनुत्पादकालो विशेषणीय इति वयं युक्तमुत्पश्यामः॥ नचैवमनुमित्सा [illegible] नान्तरं प्रत्य
क्षीकृते विषये तदग्रिमक्षणोत्पन्नपरामर्षेणानुमितिजननापत्तिः॥ तन्मात्रदृष्टापत्तेः॥ प्रत्यक्षानन्तरोत्पन्नाया
द्वित्रिक्षणाव्यवहितायां तस्यामनुमित्याभाव्यं॥ ननु प्रत्यक्षाव्यवहितायां तस्यामित्यत्र नियामकाभावादिति
सिसाधयिषावात्र न सिद्धित्वप्रकारकसिद्धीच्छाविवक्षिता॥ मननेच्छुच्छेत्तद्विरहे पापक्षतानापत्तेः॥ नापिसि
द्धिविषयेच्छामात्रं॥ प्रत्यक्षेण ज्ञानीयामितीच्छायामपि पक्षतापत्तावनुमित्यापत्तेः॥ नाप्यनुमितित्वप्रकारकेच्छा
मात्रं॥ एकलिङ्गावगते लिङ्गान्तरेणानुमित्सायामप्यनुमित्यभावापत्तेः॥ नाप्यनुमितिमात्रागोचरेच्छा सा सिद्ध्य
नन्तरं पुनर्ज्ञानीयामितीच्छायां प्रत्यक्षादिसामग्रीविरहकाले परामर्षसत्वेप्यनुमि [illegible] त्यभावा
पत्तेः॥ किंतु अनुमितिगोचरेच्छामात्रं विवक्षितं॥ सा च [illegible] अनुमितित्वप्रकारा सिद्धित्वप्रकारिका चेति विशेषणादर

रिका

वि

68

पीयः॥ न चैवं धूमेन वह्न्यनुमित्सायामालोकादिनापि तदनुमित्यापत्तिः॥ यानुमितिर्यत्रोत्पद्यते तद्गोचरानुमित्साया नि
वहितत्वात्॥ नन्वेवं पुरुषं जानीयामितीच्छायां संशयस्थले प्रत्यक्षसामग्र्यां सत्यामनुमित्यापत्तिः॥ अनुमित्सा सत्त्वे
प्रत्यक्षसामग्र्यापि प्रतिबन्धासत्त्वादिति वाच्यं॥ प्रत्यक्षसामग्र्यां प्रत्यक्षेतरसिद्धिमात्रगोचरेच्छाया उत्तेजकत्वा
त्॥ तस्याश्चात्रासत्त्वात्॥ न च पुरुषयत्रैकैवानुमि विवक्षितेति॥ ननु सिसाधयिषा तत्पुरुषीया तत्साध्यीया तत्का
लीना च स्वयं विवक्षणीया॥ अन्यथा व्यधिकरणामन्यसाध्यीयामन्यकालीनां च सिसाधयिषादाय पक्षता
सत्त्वे सिद्धसाधनस्थलेप्यनुमित्यापत्तिः॥ एवं च तादृशसिसाधयिषायाः घनगर्जितस्थलादावप्रसिद्धेः क
थं तद्घटितत्वं पक्षतेति चेत्॥ अत्राहुः॥ स्वीयसिसाधयिषाविषयत्वाभावसमानाधिकरणसिद्धिविषयत्वाभाव
साध्यकपक्षता॥ नन्वत्रापि सिसाधयिषायां तत्कालीनत्वं विवक्षितं न वा॥ आद्ये घनगर्जितादावप्रसिद्धिः॥ अन्त्ये अ
न्यकालीनसिसाधयिषामादाय सिद्धसाधनेपि पक्षतास्यादिति चेत्॥ न॥ सिसाधयिषाविषयत्वस्य विशेषणते
न तत एव तत्कालीनत्वलाभात्॥ न तु तदपि विशेषणत्वेन प्रवेश्यं॥ येनोक्तदोषः स्यादिति॥ एवं च द्वित्रिक्षणोत
रितायां सिसाधयिषायामनुमितिस्तदभ्युपगन्तृमते कथं स्यादिति चिन्त्यं॥ किं च॥ पक्षान्तरे तत्साध्यीयसिसा

३॥

॥७७॥

केतो... घेकरणायांश्च्यकाली नाया ध्यसिसाधयिषा यास्तदा तत्पुरुषविरहेऽपीति तामादायातिप्रसंगः सावा तल्लिंगकतत्पक्षकत्साध्यकानुमितिर्यो यरे

नादृशीव घनगर्जितादिस्थलेऽपीश्वरेछेवप्रसि द्धतिनो क्तदोषद्वतिध्येयं ॥ यं ॥

वसाधिवद्रूप

घयिषायां यत्र पक्षे सिद्धसाधनं तत्रापि पक्षता स्यात् ॥ तामेव सिसाधयिषामादाय विशिष्टाभावसत्वादिति ॥ नेनवृत्तीयतत्पक्षीयसिसाधयिषा ... निष्ठयत्किंभावो विवक्षितः ॥ यत्र पक्षे यस्य पुरुषस्य कदा ... चिदपि न सिसाधयिषा तत्पक्षकानुमितिस्थले पुनरप्रसिद्धिरिति चिंत्यं ॥ परंतु सिषाधयिषानुमितित्वावच्छिन्नेति सिसाधयिषाविशेषसामग्रीसामान्यसामग्रीपरामर्शमात्रमिति पक्षता हेतुरवैति ॥ तन्न ॥ एवं मणिसमवधा नकालीनदाहत्वावच्छिन्नेनजनकविशेषसामग्रीतिविशिष्टाभावस्तत्रापि न हेतुः स्यात् ॥ यथा चात्र ... स्थापत्तिस्तथाचशक्तो वक्ष्यते ॥ ननु तादृशसिद्धेः प्रतिबंधकतया तदभावरूपा पक्षता प्रतिबंधकाभाव रूपतया हेतुर्वाच्या तच्च न संभवति ॥ कार्यसमानकालीनत्वात् ॥ अन्यत्र प्रमितिबंधकाभावस्य कार्यस मानकालीनत्वेनैव हेतुत्वावधारणादिति चेत् ॥ न ॥ मण्यादिसमवधानकालेऽपि दाहापत्त्या बाधके नान्य त्र तथाकारपालेऽप्यत्रैतदभावेन गौरवेण च तथा हेतुत्वाभावात् ॥ कार्याभावातिरिक्तप्रतिबंधकाभावे तथानि यमाद् ॥ व्याप्तिस्मरणमिति ॥ व्याप्तिनिश्चय इत्यर्थः ॥ लाघवादिति ॥ अतिरिक्तविशिष्टवैशिष्ट्यावगाहिज्ञानकल्प नापेक्षया लाघवादित्यर्थः ॥ ज्ञानद्वयादिति ॥ अत्र ज्ञानद्वयत्वमविवक्षितं ॥ तथायगोचरैकसमूहालंबना

दप्यनुमित्युत्पत्तेरिति ध्येयं॥ लाघवादिति॥ व्याप्यतावच्छेदकप्रकारकज्ञानत्वापेक्षया व्याप्यत्वप्रकारकज्ञानत्वस्य
कारणतावच्छेदकस्य लघुत्वादित्यर्थः॥ तदपनीयत्वादिति॥ व्याप्यत्वग्रहं विना व्याप्यतावच्छेदकत्वज्ञानाभावादित्य
र्थः॥ ननु सामग्रीबलेन व्याप्यत्वप्रकारकज्ञानसिद्धौ युगपदुपस्थितिः स्यादिति शंकते॥ तत्रेति॥ बलवत्वादि
ति॥ समाने विषये प्रत्यक्षसामग्र्या बलवत्वेपि भिन्नविषयेऽनुमितिसामग्र्या एव बलवत्वादित्यर्थः॥ तथा च यु
गपदुपस्थित्यभाव एवेति भावः॥ इंद्रियेति॥ तथा च व्यभिचारशंकायोरपि न हेतुत्वमिति भावः॥ परामर्श इति॥ त
था च न व्यभिचार इति भावः॥ प्रमाणांतरतापत्तेरिति॥ प्रमाणांतरत्वेन परिगणनापत्तेरित्यर्थः॥ न च त्वन्मते इति॥
धूमे वह्निव्याप्यत्वपरामर्शसंभवेऽपि धूमत्वेपि वह्निव्याप्तिव्याप्यत्वपरामर्शस्यासंभवः॥ विशेष्यासन्निकर्षस्योभयत्रा
पि समानत्वात्॥ व्याप्तिस्मृतिर्धूमत्वेन धूमवत्[illegible] ज्ञानमिति ज्ञानद्वयरूपा मद्रीत्या धूमे व्याप्यत्वानुमितिसा
मग्रीतत्राप्यस्त्येवेति भावः॥ अत एवेति॥ यत एवोक्तयुक्त्या व्याप्यतावच्छेदकप्रकारिकाधीरनुमितिहेतुरत ए
व यदा धूमादिप्रत्येकेऽपि वह्निव्याप्यवच्छिन्नेसकलवह्निव्याप्यनिष्ठमहाव्याप्यंतरविषयं यो वह्निव्याप्य
वान्सो वह्नेयं वह्निमानिति ज्ञानं तदा परमनुमितिर्न तु तदभावेपीत्यर्थः॥ नेति॥ अत्र धूमो वह्निव्याप्य इति स्म

रणमस्ति नवा ॥ अन्येति तद्दर्शनादेव नानुमितिः ॥ आवेवाह ॥ धूमो वह्निव्याप्य इति तुल्यमित्यापाततः ॥ वस्तुतः सं
शयाभाव एव तात्पर्यं ॥ अन्यथा साक्षाद्विरोधिनः संशयस्य जनकीभूतव्याप्यत्वनिश्चयविघटनद्वारैव प्र
तिबंधकत्वं स्यान्नत्वन्यथेति ध्येयं ॥ यत्र हीति ॥ यदवच्छेदेन यद्धर्मनिश्चयस्तद्धर्मिज्ञानं तद्धर्मकोटिकसंशय
विरोधि ज्ञानं वा तान्न तु तदवच्छिन्नेतत्कोटिकसंशयविरोधि गौरवादित्यर्थः ॥ न च घटत्वेन तद्निश्चये प
थिवीत्वेन तत्संशयस्याप्रसक्तत्वात् कथमेतदिति वाच्यं ॥ एतदनुशयादेव तत्र मतान्तरमेवेति भावः ॥ नकेव
लव्यावर्तकधर्मदर्शनादेव संशयाभावः ॥ किंतु भिन्नविषये प्रत्यक्षसामग्रीतोऽनुमितिसामग्र्या बलवत्वा
दपि न संशय इत्याह ॥ वस्तुतस्त्विति ॥ एवकारो भिन्नक्रमः ॥ अनुमितिरेव [ ] भवति ॥ न तु संशय इत्यर्थः ॥
न्विति ॥ इह पर्वते भावोऽभावो वा भयथापि प्रमेयमस्तीति [ ] भावाभावान्यतरत्वेन प्रमेयत्वेनानुमितौ भावत्वा
भावत्वयोर्व्याप्यतावच्छेदकयोरनिश्चयेऽ[ ] नन्यगत्या व्याप्यत्वधीर्हेतुरित्यर्थः ॥ ननु भावत्वादिना प्रमेय
त्वसाध्यभावत्वाभावत्वपदं तद्वृत्तिधर्मपरमित्यर्थः ॥ अ[ ] थाँभावो वाभावो वा नभयथापि प्रमेय इति पुल्लिंगनिर्देश
[हि]

निश्चयत्वर्थ-

शापत्तिः।। लिंगत्वाभावादिति।। लिंगतावच्छेदकत्वाभावादित्यर्थः।। भावान्यान्यप्रसिद्ध्यातदन्यान्यत्वरूपस्य
तस्याप्रसिद्धत्वाल्लिंगतावच्छेदकत्वाभावादित्यर्थः।। लिंगत्वादिति।। लिंगतावच्छेदकत्वादित्यर्थः।। लिंगमिति।। अ
यमालोको वा धूमो वोऽन यथापि वह्निव्याप्य इति शेषः।। तत्राप्रसिद्ध्यभावादित्यर्थः।। यद्व्यतिरेकज्ञा
नमिति।। व्याप्त्यतिरिक्तयद्व्यतिरेकज्ञानमित्यर्थः।। यत्तु यद्व्यतिरेकज्ञानत्वावच्छिन्नं यत्प्रतिबंधकं इत्यर्थः।।
अतएवालोकेज्ञानेति। ननु व्याप्यविरहज्ञानत्वावच्छिन्ने तथा व्याप्यविरहसंशयस्याप्रतिबंधकत्वादिति य
थाश्रुतेनैवोपपत्तौ व्याप्यातिरिक्तत्वेति विशेषणमयुक्तमिति।। तन्न। एवमप्यव्यभिचारव्यतिरेकज्ञानत्वा
वच्छिन्नमव्यभिचारनिश्चयप्रतिबंधकं। न व तन्निश्चयस्तद्धेतुरिति व्यभिचार वारणाय
तद्विशेषणस्यावश्यकत्वात्। नन्वेवं धूमत्वेति पूर्वपक्षधर्मविषयस्य धूमो न वह्निव्याप्य इत्यस्य सामान्याकारस्य
व्याप्यत्वभेदज्ञानस्य प्रतिबंधकत्वमथ यादिनाशंकिते संप्रतिपक्षधर्मधूममात्रविषयस्य तथात्वमाशं
क्य तदुपपोनरुक्त्यं।। न चेह धूमव्यक्तिपदवत्त्वपक्षधर्मपदसत्वेनोक्तापोनरुक्त्याभाव इति वाच्यं।।
सामान्याकारभेदज्ञानस्यापि पक्षधर्मविषयत्वाविरोधात्। तन्मात्रविषयत्वबोधकपदस्य भावात्।।

।।७१।।

क्ते

यत्तु व्याप्यभाववत्त्वमपरत्वमेतस्य। तस्य व्याप्यभेदवत्त्वमपरत्वमित्यपौनरुक्त्यादिति॥ तन्न। वह्निव्याप्यनेतिपद
पर्यालोचनया स्यापि व्याप्यभेदवत्त्वमपरत्वावसायात्॥ अत एवाक्तं वेत्यादिना भेदाग्रहस्यैव हेतुत्वमुक्तं दोषनि
रासाय वक्ष्यति ननु व्याप्यभावाग्रहस्येति। अन्यथेति॥ यद्यनुमितिसामग्र्यामप्यनुमित्यनुत्पादस्तदेत्यर्थः॥
निश्चयेति। निश्चयसामग्र्यां व्याप्याभेदभानसामग्र्यां सत्यां धूमो वह्निव्याप्यो न इति भेदभ्रमाभावादनंतरं
निरंतरपरामर्शे कुतो न भवतीत्यर्थः। तथा च परामर्शस्वीकारपक्षेपि यदुत्तरोत्तरपरामर्शधारा नोत्पद्यते॥
तत्रानुमितिसामग्रीतत्रमित्यत्रापि ज्ञानद्वयात्मकत्वसामग्रीसत्वेऽनुमितिरेवस्यान्न तु व्याप्यभेदप्रत्यक्षमिति
भावः॥ अन्ये तु यदि तत्र तादृशाभ्रमोत्पत्तिरभ्युपेयाते दा तदभिमतविशेषदर्शनादिरूपपरामर्शसामग्र्यां स
त्यामुक्तभ्रमासंभवात् उद्भ्रमोत्पत्त्यधिकरणालीकमतकाले परामर्श एव कुतो न भवतीति त्वन्मते पर्यनुयोगदु
त्याहः॥ अभ्युपगमवादेनाह॥ अस्तु वेति॥ अभेदेति। त्वयापि तादृशस्य जनकज्ञानाविरोधित्वेनाभेदज्ञान
स्य लिंगपरामर्शप्रतिबंधकत्वस्वीकारात्॥ तस्य कथं जनकज्ञानविरोधित्वमित्यत उक्तं अभेदज्ञानस्य

५

ति। न ह्यभेदज्ञानं परामर्षेऽपि जनकमिति कश्चिदभ्युपैति। तथा च व्यभिचारान्नायं नियम इत्यर्थः॥ ग्राह्याभा
वेति। न त्वविशेषितापि नेयं व्याप्तिरप्रयोजकत्वादित्यत्र तात्पर्यं॥ गोत्वे गोपदप्रवृत्तिनिमित्तत्वं धर्मान्तरम
स्तीत्यत उक्तं॥ मधुरत्वेति॥ तस्याः पदविशेषप्रवृत्तिनिमित्तत्वमपि नास्तीति भावः। व्यक्तेरिति॥ व्यक्तिघ
टितधर्मस्येत्यर्थः॥ न हीति। न ह्यनयोर्ज्ञानयोर्गोत्वविषयतायां विशेष इतीत्यर्थः॥ निर्विकल्पकत्वे
ति। गौरिति ज्ञाने यथा गोत्वांशे निर्विकल्पकत्वमेवमस्यापीति निर्विकल्पकत्वापत्तेरित्यर्थः। तथा चात्र
व्यक्तिरेव प्रकार इति नाविशेष इत्यर्थः। अनुपयोगादिति। व्याप्यतावच्छेदकाप्रतीतेरित्यर्थः। लिंगं॥ लिंग
तावच्छेदकं। न चेति। तत्रेति शेषः। अन्यथा धूमादेरपि तत्र हेतुत्वं न स्यादिति ध्येयं। व्यभिचारेति। व्या
प्तिग्रहानुपयुक्तविशेषणकत्वादित्यर्थः॥ पुरुष इति। तथा च स्वार्थानुमितौ न किंचिद्बाधकमिति भा
वः। तदन्यान्यदिति। क्वचित्तदन्यान्यमिति पाठः। तदा तदन्यदन्यद्यस्मिन्निति बहुव्रीहिर्बोध्यः॥ तदन्या
न्यत्वादिति। धूमत्वालोकत्वान्यान्यधर्मकत्वादित्यर्थः। न तु धूमालोकान्यान्यत्वादित्यर्थः। तथा सति व्यर्थ

१२ ॥

॥१९॥
॥८०॥

धूमालोकान्यप्रतियोगिकान्योन्याभावे।२

विशेषणत्वानवकाशात्। प्रत्यक्षं हीत्यादिना व्यर्थविशेषणत्वमभ्युपेत्य परिहारासंभवाच्च। न हि धूमा
लोकान्योन्यत्वे वह्निव्याप्तिव्याप्यतावच्छेदकमन्योन्यत्वमपहाय धर्मांतरमस्ति। येन व्यर्थविशेषण
त्वं स्यात्।। धूमालोकादौ वह्निव्याप्यतावच्छेदकं धूमत्वादिकमेवास्तीति तत्र व्यर्थविशेषणत्वं युक्तं।। व्याप्य
तापि मते लघुनावच्छेदकेन व्याप्तिग्रहे संभवति गुरुणा तदग्रहात्। निरूढधूमत्वत्वादेरवच्छेदकत्वात्त
दन्योन्यत्वं नावच्छेदकं गौरवादिति भावः। प्रत्यक्षं हीति। यद्यप्युक्तरीत्या व्यर्थविशेषणत्वाभावे न धूमालो
कान्योन्यत्वाद्वह्निव्याप्यत्वानुमानं संभवत्येव। तथापि प्रत्यक्षसामग्र्याः बलवत्त्वात्तस्य त्वेतज्ज्ञानस्यापि वि
शेषदर्शनत्वेनैवोपयोग इति भावः। अन्यथेति। करचरणान्यरत्वनिश्चयानंतरसंशयोत्तरप्रत्यक्ष
स्य सर्वजनसिद्धत्वात् गुरोरपि धूमत्वालोकत्वान्योन्यधर्मवत्वस्य ज्ञानं प्रत्यक्षे सहकारि स्यादित्य
र्थः। ननु तदन्योन्यधर्मवत्वज्ञानमपि स्वरूपेण प्रत्यक्षे सहकारि नेति वाच्यं।। अतिप्रसंगात्।। किंतु व
ह्निव्याप्तिव्याप्यत्वेन। तच्च न संभवति। धूमत्वत्वादेर्व्याप्यतावच्छेदकस्य निश्चयात्। निश्चितस्यैत

८१॥

दन्यान्यधर्मत्वाद्गौरवेणतदनवच्छेदकत्वादिति चेति। व्याप्यतावच्छेदकरूपेणानुपस्थितेपि फलबले व्या
प्तिग्रहस्वीकारात्। सहचारदर्शनादिव्याप्तिधीसामाग्रीसत्वे तद्व्यतिरेकेण व्याप्तिग्रहव्यतिरेकादर्शनात्।
अतएव व्याप्यतावच्छेदकेनधूमत्वेनालोकान्यान्यत्वेनोपस्थितएव पक्षधर्मे व्याप्तिग्रहः सर्वसिद्ध इति भावः। ए
वंच वह्निव्याप्तिव्याप्यत्वपरामर्षस्यानिकल्पत्वात्तदनुमानमपि संभवति। तथापित्यप्रक्षसामग्रीसत्वे
तान्निरवकाशमिति तथोक्तमिति स्मर्त्तव्यं। ननु व्याप्यतावच्छेदकेनदनवच्छेदकेन वा व्याप्यत्वनियमतस
मानाधिकरणतया गृहीयमानेन रूपेण पक्षधर्म्मज्ञानामनुमितिहेतुरुक्त तत्त्वात्राव्याप्यस्यैवेत्यनुशय
नीहं॥ किंचेति। अथ वह्नीति। तथाचयो वह्निव्याप्यवान्सोवश्यं वह्निमानिति वह्निव्याप्यत्वावच्छि ~ न्नस
क ~ धूमादि वृत्तिमहाव्याप्तिज्ञानेनतएवानुमितिरितिमदुक्तानुमितिसामग्री तत्राप्यस्त्येवेति भावः। ननुयो
धूमवान्सवह्निमानिति वतयो वह्निव्याप्यवान्सोवश्यं वह्निमानिति महाव्याप्त्यनुभवो दुरपह्नवः। अन्य
था पूर्वोक्त व्याप्तिलक्षणानामतिव्याप्तिप्रसंगात्। एवंचत्राव्दपरामर्षस्यलेप्यनन्यगत्यातद्ज्ञानेकल्प

॥८१॥

नीयमितिमदुक्तसामग्र्यत्रास्त्येवेत्यनुवायेनाह। अपिचेति। लाघवादिति। व्याप्यतावच्छेदकप्रकारकत्वापे
क्षया व्याप्यत्वप्रकारकत्वस्य लघुत्वादित्यर्थः। एवं च वह्निव्याप्यवानयमितिशाब्दपरामर्शस्थलेमहो। व्याप्ति
ज्ञानेनकस्यल्यनीयमितिभावः। सप्रमाणकत्वादिति। लाघवसहकृतप्रथमप्रवृत्तविशिष्टज्ञानकार
णतायाहकप्रमाणमूलकत्वादित्यर्थः। ननुगौरवात्तदेवप्रमाणंकथंप्रवर्त्ततेत्यत आह। कारणेति। विशि
ष्टज्ञानकारणतायहः फलं तन्मुखमुपस्थितिवीजं यस्य तत्फलमुखं तथा च विशिष्टज्ञानस्यासिद्धौ गौर
वज्ञानस्यासत्वादेव न तत्कारणताग्रहपरिपंथित्वं। ततः सिद्धौ च तद्ग्रहे कमानकविशिष्टज्ञानमूलकस्य गौरव
ज्ञानस्य न तद्ग्रहपरिपंथित्वमुपजीव्यविरोधादितिभावः। ननु व्याप्यत्वप्रकारकज्ञानविषयीभवद्धर्म्मिमात्रगतं
यत्प्रतीयते तत्प्रकारकपक्षधर्म्मताज्ञानत्वेन हेतुत्वमस्तु। तत्र विशिष्टज्ञाने ज्ञानद्वये चास्ति प्रत्ययमेव्याप्यत्वस्य
द्वितीयधूमवादेः तादृशास्यप्रकारत्वेनोभयानुगतस्य तस्य हेतुतात्वात्। तथा च यत्र सामग्रीबलेन विशि
ष्टज्ञानं तत्र तस्यापि हेतुत्वं। यत्र तु ज्ञानद्वयं तत्र तत एवानुमितिर्नत्वतिरिक्तविशिष्टज्ञानकल्पनं गौरवात्।

78

प्रयोजनाभावाच्चेतिचेत्॥ न। एतदपेक्षया व्याप्यत्वप्रकारकत्वस्यैव लघुत्वात्॥ ननु यद्येवं कारणतास्या
तद्दातिरिक्तविशिष्टज्ञानकल्पनास्यादिति चेत् किं ततस्तदा दायगौरवात् ज्ञानाद्धर्म्मिकल्पनातो धर्म्मकल्पना लघीय
सीति न्यायेन ज्ञानद्वयस्यैव गुणारूपावच्छेदकेनैव तु त्वं कल्प्यतां इति चेत् न। एवं विधगौरवज्ञानस्य प्रमाण
प्रवृत्यपरिपंथित्वात्॥ अत एव लाघवेन कर्म्मधारयप्रवृत्त्या निषादस्थपत्यधिकरणे शूद्रस्य विद्याप्रयुक्ति
रपूर्वो कल्प्यता इति परसिद्धान्तः। अन्यथा यद्यत्र कर्म्मधारयऽस्यात्तदा शूद्रस्य विद्याप्रयुक्तिकल्पना
गौरवं स्यादिति चेत् किं तं तत्प्रतिसंधानेन तत्कल्पनमपि न स्यादिति॥ एतेन ज्ञानद्वयसाधारणमप्यवच्छेद
कं निरस्तं व्याप्यत्वप्रकारकत्वापेक्षया सर्वस्यैव गुरुत्वात्॥ ननु सामान्यस्यौत्सर्गिकतया गुरुणापि पूर्वो
क्तावच्छेदकेन हेतुत्वसत्त्वात् अत एव कर्त्तृजन्यतावच्छेदके कार्य्यत्वं सुपाधिरूपं न तु जातिरूपं घटत्वादिकमिति
चेत्॥ न। तत्र घटत्वादीनामानंत्यात्॥ यत्र तु विशेषस्यैकस्य लघुत्वं तत्र न सामान्यस्य गुरोरवच्छेदकत्वमत ए
वाख्यातवाच्यत्वे पत्नेत्वमेव तथा न तु व्यापारत्वमिति संक्षेपः॥ अनुमायनयोरिति॥ काचित्काभिप्रायेणेदं वा
ध्यं॥

अन्यतरसाध्यमन्यतरानुमानेपक्षतावच्छेदकीकृत्यानुमानेनापि सहचारग्रहस्य क्वचित्संभवात्तन्नियतेति
ष्यरूपनिर्वचनमनियतस्य व्यापारत्वाभावादिति ध्येयं। संस्कारात् स्मरणाद्वेति मतभेदेन। पृथगिति। स्वा
तंत्र्येणेत्यर्थः। व्याप्तिस्मरणादिना संशयस्यैव नाशनस्वाभाव्यान्नं कुतस्तज्ज्ञानककोटिस्मृतिरित्यनुशयादाह॥ न
चेति। गौरवादित्युपलक्षणं। प्रामाण्यसंशयजन्यार्थसंशये व्यभिचाराच्चेत्यपि द्रष्टव्यं। सामान्यलक्षण
याप्रवृत्तेरपि वह्न्यवगमादाह। विशिष्येति। अलौकिकं प्रत्यक्षं निरस्य लौकिकं तदाशंक्य निरस्यति। न चेति
विशेषदर्शनमिति। एतच्च संशयाधिकरणप्रत्यक्षेपि ज्ञेयमन्ये तु पदवच्छेदेनापूर्णेयं ज्ञानं तद्दर्शनपरं तदि
त्याहुः। व्याप्तिविशिष्टेति। व्याप्यापि समज्ञानलक्षणप्रत्यासत्तेः सत्त्वादित्यर्थः। वह्नेरसन्निकर्षादिति॥ सं
योगलक्षणसन्निकर्षाभावादित्यर्थः। ननु यथा व्याप्तौ ज्ञानमेव प्रत्यासत्तिस्तथा वह्नावपि तदेवास्तु। न च व्या
प्तेः सामानाधिकरण्यात्मकत्वेन संयोगादिरूपतया संयुक्तसमवाय एव तत्र प्रत्यासत्तिरिति वाच्यं। न हि संयो
गादिकमेव व्याप्तिः। किं तु साध्यादिनापदार्थविशिष्टं न च विशिष्टे संयुक्तसमवायः। न च साध्यादिके विशेष

७९

ण विशेषणं न तत्सन्निकर्षोप्यपेक्षणीयो मानाभावादिति वाच्यं। विशेषणसन्निकर्षस्यापि हेतुत्वे माना
भावात्। विशेष्यसन्निकर्षत्वापेक्षया विषयसन्निकर्षत्वेन हेतुत्वं लाघवादिति यदि तदा विशेषणविशे
षणसन्निकर्षोपि तुल्यं। व्याप्तौ वा यथा तथास्तु वह्नौ ज्ञानेन मम प्रत्यासत्तिरस्तु। न च पर्वते पुरा वह्नेरनवग
मात् कथं तदुपनीतभानं तत्रेति वाच्यं। सामान्यलक्षणया धूमवत्त्वावच्छेदेन वह्निबोधने पर्वतेपि तत्तज्ज्ञा
नात्। विशिष्य तज्ज्ञानस्यापि अप्रयोजकत्वात्। अन्यथा पक्षधर्मे व्याप्तिप्रत्यक्षानुपपत्तेः वस्तुतः पदवृ
देन यो धर्मोपस्थितस्तदवच्छेदेन तद्धर्मिज्ञानं तद्धर्मोपनयसामग्री तथा च धूमवत्त्वेन ज्ञाते पर्वते वह्निमत्तो
पनयः स्यादेवेति चेत्। न। ज्ञानरूपप्रत्यासत्त्या पर्वते वह्निप्रत्यक्षसामग्र्या अनुमानमलौकिकमेव स्यात्। न
वा लौकिकप्रत्यक्षसामग्रीमात्रान्तरप्रवृत्तिप्रतिबन्धिका। तस्याः समानेपि विषयेनुमित्यादिसामग्रीतो दुर्बल
त्वात्। अन्यथा मानान्तरविलयापत्तेः। शब्दादिस्थलेपि पदादिस्मारितपदार्थानां कविकाव्यमलक्षत्त तज्ज्ञा
नावगमनसेवप्रत्यक्षसंसर्गप्रत्ययसम्भवात्। बलवत्त्वस्य च फलबलकल्प्यत्वात्। यद्यप्येवं करभ्रमासंसा

॥८३॥

यांतर प्रत्यक्षे पुरुषभ्रमो न स्यात्। तस्यालौकिकत्वात्।। अलौकिकप्रत्यक्षसामग्र्या अपि भ्रमानुमितिसामग्र्य
पेक्षया बलवत्वे धूमभ्रमादृद्यनुमिति भ्रांता न स्यादिति।। तथापि फलबलादनन्यगत्या दोषविशेषस्यैव ब
वत्वप्रयोजकत्वेतिध्येयं। तस्मात् समाने विषये लौकिकप्रत्यक्षसामग्र्या बलवत्वात् सत्वे वह्निप्रत्यक्षमेव स्यान्न
त्वनुमितिरित्येवं परास्तिमतं तत्रेदमुत्तरं न लौकिकवह्निप्रत्यक्षसामग्री वह्नेरसन्निकर्षादिति।। ननु भवेद
वं यदि विशेषणसन्निकर्षोपि हेतुः स्यात्। नचैवं मानाभावात्। किंतु तत्ज्ञानं। आवश्यकत्वात् तद्वावश्य
स्यैवेति न लौकिकप्रत्यक्षसामग्री विरह इति चेत् न। तदितरसकलतद्धेतुसत्वे पर्वते वह्न्यनुमितिसमये
तद्विशिष्टप्रत्यक्षानुत्पादस्यैव तत्रमानत्वात्। लौकिकप्रत्यक्षसामग्रीसत्वेनुमितिसामग्रीबलवत्वस्यापि वक्तु
मशक्यत्वात्। नचात्र प्रत्यक्षमेवोत्पद्यत इति वाच्यं। वह्निमनुमिनोमीत्यनुभवस्याबाधितत्वात्। यत्तु विशेष्यस्य वि
षयविशेषतया तत्सन्निकर्षत्वापेक्षया विषयसन्निकर्षत्वेन हेतुत्वौलाघवाद्विशेषणसन्निकर्षोपि हेतुरिति तन्न
न्ना। एवं हि पर्वते वह्निप्रत्यक्षं स्यादेव पर्वतरूपविषयसन्निकर्षसत्वात्। कारणतावच्छेदकावच्छिन्नयत्किंचित्सत्

75

१०

तएव कार्य्योत्पत्तेः। विशेषणसन्निकर्षे विशेष्यासन्निकर्षे तद्विशिष्टप्रत्यक्षापत्तेश्च। न चायावद्विषयसन्निकर्ष
त्वेन हेतुत्वमिति वाच्यं। एतदपेक्षया विशेष्यसन्निकर्षत्वस्यैव लघुत्वात्। संसर्गस्य पूर्वोक्तात् तस्यैव भानाभ्यु
पगमे न भ्रमस्य लोके वसन्निकर्षासंभवेन व्याप्तिर्वा वाच्या। किंवा विशेषणविशेष्यसन्निकर्षयोर्न्नैकमवच्छेदकं। वि
शेषणसन्निकर्षस्यालौकिकसाधारणस्यैव हेतुत्वं भ्रमसाधनुरोधात्। विशेष्यसन्निकर्षस्य च लौकिकस्यै
व प्रत्यक्षविशेषे चक्षुरादिसहकारित्वं। अन्यथा स्मृत्युपनीते व्यवहिते पुरुषे दण्डस्मृतिमतो दण्डीति चाक्षुषत्व
व्याप्तेः। अन्ये तु असंसर्गाग्रहदशायामपि देवदत्तदण्डस्मृतिमतः सन्निकृष्टेऽपि व्यवहितदण्डे पुंसि दण्डीति बु
द्धिर्नोत्पद्यत इति सर्वानुभवसिद्धं। तथा चात्र व्यतिरेकाभ्यामेव तस्य हेतुत्वमिति आहुः॥ पक्षधर्म्म इति। वं पर्व
त इति धर्मी वह्निव्याप्य इत्याद्याकारकज्ञानमित्यर्थः। विशिष्टेति। वह्निव्याप्यधूमवानयमित्याद्याकारमित्यर्थ
अतएवेति। यो यो धूमवानित्यनेन न वह्नेरत्यन्ताभावो व्यवच्छिद्यते। तेन तादृशात्यन्ताभावप्रतियोगित्वं साध्य
स्य प्रतिपाद्यते। वह्निमानेव धूमवानित्यनेन वह्न्यभाववान्नाधूमवान् इति वह्निविरहवत्व्यावृत्तत्वं धूम

८४॥

॥८४॥

निरुक्तं प्रतिपाद्यते। तदेव च व्याप्यत्वमिति तद्बोधस्यानुमितिहेतुत्वे अन्ययोगव्यवच्छेदेनैवोदाहरणं स्यादित्यर्थः।
ज्ञो ऽत्रेदमनभिमतिधीजमादुः। जनकज्ञानस्य यावद्विषयतया व्रवेन त्वं तावन्मध्ये यत्साधान्येन भासने तदेव
जन्यज्ञानेन पितावन्मध्ये प्राधान्येन स्फुरतीति नियमः। पुरुषस्य दण्ड इति ज्ञानस्य च दण्डी पुरुष इति ज्ञाने
दण्डमात्रविषयतयैव जनकत्वमतो न व्यभिचार इति। तन्न। भूतले घटो नास्तीति ज्ञानजन्ये घटाभावव
द्भूतलमिति ज्ञाने तथापि व्यभिचारात्। तत् ज्ञानस्य भूतलविषयतया विपि जनकत्वात्। न चाभावविशेष्य
कप्रत्यक्षे एवाधिकरणज्ञानस्य जनकत्वमिति वाच्यं। शाब्दे नाभावप्रत्यक्षत्वावच्छिन्ने एवाधिकारणत्वे दोषा
नभिधानात्। यत्तु सामानाधिकरण्यगर्भितया व्याप्तिर्गुर्वी व्याप्यज्ञानस्य हेतुत्वात्। यदपि केचित् नवीनमुक्तं
अयोगव्यवच्छेदेन साधनव्यापकता वह्निरूपदर्शनत इत्ययुक्तं केवलान्वयिनि साध्याप्रयोगाप्रसिद्धेरिति। तदु
पिन एवमपि शाब्दे न व्यापकताज्ञानकारणत्वे दोषानभिधानात्। यत्तु सामानाधिकरण्यगर्भितया व्याप्तिर्गुर्वी
व्यापकत्वं तदप्रवेशाल्लघीयस्त्विति यदि तस्य हेतुत्वं तदा साध्याप्रसिद्धेति योगिकेरण्य समानाधिकरणात्यन्ता

भावकत्वमेव व्याप्यत्वमस्तु। व्यापकत्वघटकानामेकैकपदार्थानामात्रापि प्रवेशो न तदपेक्षया गौरवात्। वादिति
तत्रास्वरसबीजं। तन्नाए तावतापि व्याप्तिज्ञानकारणतायां विनिगमकानिरुक्तेः। किंचैतद्रूपव्याप्यपेक्षया
व्यापकत्वमेवल्लघुतादृशयावदन्यताभावकत्वस्य यावद्घटितत्वेन गुरुत्वादन्ययाव्याप्तिघटितसाधार
ण्यात्। स्वसमानाधिकरणात्यन्ताभावप्रतियोगित्वसामान्याभावरूपव्यापकत्वे यावत्त्वाप्रवेशं नव्या
य वादिति॥ अन्ये तु पर्वतं इति धूमव्यापकत्वं वह्नौ ग्राह्यं॥ तच्चस्मृतमुपनेयं। तथा च वह्निविशिष्टान्य
त्रापि तु यदि गृहीतं तदा तस्याप्यनुमितिसामग्रीतिसमूहालंबनेनैवानुमितिः स्यान्नवैकानुमि
तिरूपनेयाप्रतीतावुपनयासिद्धेरित्येकमस्वरसबीजं अपरं च वस्तुतो लाघवमेव॥ तथाहि। तत्सु
मानाधिकरणात्यन्ताभावप्रतियोग्यसमानाधिकरणत्वं। विशेषणाभावव्यक्रमव्याप्तिप्रस्थया। तदर्थ
श्च। प्रतियोगिसमानाधिकरणभिन्नत्वं प्रतियोगिसामानाधिकरण्याभाववत्त्वं वोभयथापि
प्रतियोग्यधिकरणानधिकरणगर्भितत्वाचाकाशादेरपि व्यापकत्वापत्तिः। मेयत्वसमानाधि
करणात्ये प्रतियोग्यधिकरणाधिकरणभिन्नो अभावाघटाभावादिपरस्तदप्रतियोगित्वाद्

॥८४॥

काशस्य॥

ननु मेयत्वसमानाधिकरणस्याकाशात्यंताभावस्य प्रतियोग्यधिकरणाधिकरणाभिन्नतया
तत्प्रतियोगितयाकाशस्य कथं तदप्रतियोगित्वं व्यापकत्वमिति चेत्। नाप्रतियोग्यधिकरणाप्र
सिद्धा आकाशाभावस्य प्रतियोग्यधिकरणाधिकरणाभिन्नत्वाभावेन विशिष्टतादृशाभावा
प्रतियोगितयाआकाशस्य व्यापकत्वतादवस्थ्यात्। तस्माद्वारणाय साधनसमानाधिकरण
त्वं विशेषणमावश्यकमित्यन्यूनानतिरिक्तपदार्थगर्भतयोभयोः समानतया कथं व्यापकत्वे
लाघवमित्यस्वरसबीजमित्याहुः॥ तन्न॥ नाद्यः विशेषणे विशेषणं तत्र च विशेषणान्तरमिति
न्यायेन धूमे पर्वतवृत्तित्वं धूमव्यापकत्वं च वह्नौ भासत इत्येव पर्वतवृत्तिधूमव्यापकत्वभानो
पपत्तौ नान्यत्रापि तदपेक्षा। धूमव्यापकत्वं च वह्नावेवानुरागृहीतमिति स्वतमुपनेयमिति
कानुपपत्तिः॥ नद्वितीयः॥ स्वप्रतियोग्यधिकरणाधिकरणः संयोगाभावादयः प्रसिद्धाः तद्भिन्न
त्वस्याकाशात्यंताभावे सत्त्वात्। प्रतियोगिसमानाधिकरणत्वस्य भेदप्रतियोगिविशेषणत्वात्
एवमेव स्वोपादानगोचरजन्यकस्यजन्यत्वादावप्रसिद्ध्युद्धारा इत्यग्रे वक्ष्यते॥ तथा च यथा

ष्कृतेनैवाकाशाव्यापकत्वप्रसंगनिरासान्न साध्यसमानाधिकरणत्वमत्रापि विशेष
णं॥ येन व्यापकत्वभावाभावेन स्यादिति। किंवान्योन्याभावगर्भव्याप्तेरेवानुमितिहेतुत्वं यथ
ऽदभिमतत्वात्र हेतौ व्यापकत्वे प्रतियोग्यसामानाधिकरण्याप्रवेशाच्च। अपि चैवमपि सा
धिकरणत्वमात्रमेवोक्तदोषनिरासायास्तु। तथा व्यापकत्वे लाघवमेव। तस्मादिदमत्रास्व
रसबीजं। शब्दादिना व्यापकत्वे निश्चिते साधने साध्यसामानाधिकरण्यस्य संशये व्य
तिरेकनिश्चये वानुत्पादात्तन्निश्चयस्तद्धेतुः। यद्व्यतिरेकज्ञानं यदुत्पत्तिप्रतिबंधकं तन्नि
श्चयस्य तद्धेतुत्वात्। न च व्यापकत्वस्य साध्यसामानाधिकरण्यनियततया तद्दाने तत्सं
शयाद्यनवकाश इति वाच्यं॥ न हि वस्तुतस्तद्व्याप्यज्ञानं तद्विरोधि किंतु व्याप्यत्वेनैव तज्ज्ञानं
तथा च तदप्रतिसंधानदशायां तत्संशयादिकं स्यादेव यदि वैतद्दोषभिया साध्यसामानाधि
करण्यानियतत्वेनैव व्यापकत्वज्ञानमनुमितिहेतुरिति मन्यसे। तदा विपरीतमेव गौरवमिति।
दंडवादो व्यभिचारादाह॥ बाधकं विनेति। तत्रान्यथासिद्धिरेव बाधिकेत्यर्थः। अन्यथासि

॥८६॥

त्वद्धेत्वस्य तावच्छेदकजन्येतियावत्। वह्निस्फविधेयतावच्छेदक इत्यर्थः।२

द्वामिति। तथा चात्रापि बाधकमेवास्तीति भावः। धूमवान् वह्निमानिति। वर्त्तमानधूमविशिष्टे वर्त्तमा
नवह्निवैशिष्ट्यानुमितिरितिश्व यावत्। तेन नात्रातीतबाध इति ध्येयं। ज्ञायमानेति। ज्ञायमानविशे
षणतावच्छेदकजन्येत्यर्थः। तेन ज्ञायमानवह्निजन्यतया बाधान्तरमिति भावः। विशेषणेति। वर्त्ति
मानविशेष्यतावच्छेदकविशिष्टे वर्त्तमानविशेषणान्तरवैशिष्ट्यावगाहनस्य बुद्धिविशिष्टज्ञानत्वा
द्वैत्यर्थः। विशिष्टज्ञानपदं च जन्यानुभवपरं। तेनेश्वरज्ञाने स्मरणे च न व्यभिचारः। निर्वि
कल्पकस्य पूर्वप्रतिके नेव वारणात्। उपमितेश्च पदिसपद्धत्वेनाभ्युपेयते। तदा तदन्यत्वम
पि विशेषणं देयं विशेष्यभाने नेति। विशेषणान्तरभाने त्यर्थः। अन्य येति। तथा च ज्ञायमानवि
शेषणाजन्यत्वमेवानन्यगत्या तत्र नियामके कल्प्यत इत्यर्थः॥ नन्वेवमनुभयोजनकत्वेपिष्टिं
गस्य करणत्वे किं विनिगमकमित्यत आह। किं चेति। अतीतेति। नन्वेवमपि विद्यमानलिंगकानु
मितित्वावच्छेदेन लिंगस्य हेतुत्वमस्त्विति चेत्। न। अतीतादिस्थले कुप्तसामग्र्यैवानुमित्युपपत्तौ

तस्य लिंगत्वव्यवहारो नास्तीति भावः ॥ २

विशेषसामग्र्यन्तरकल्पने गौरवप्रसंगात् । अयोग्यलिंगकानुमितौ व्यभिचाराच्च । तत्र पराम
र्षस्य तद्व्यापारत्वासंभवेन लिंगस्याकरणत्वात् । शाब्दादिपरामर्षाच्चात्रानुमितिस्तत्र
विद्यमानस्यापि योग्यस्य लिंगस्याकरणत्वाच्च । परामर्षस्य तद्व्यापारत्वाभावात् । यदि नि
र्व्यापारस्यैव तत्र करणत्वं तदा तादृशपरामर्षस्यैव तथात्वमस्तु । आवश्यकत्वादिति भाव
इति वदंति । परामर्षेति । परामर्षद्वारैव तृतीयालिंगस्य करणत्वाभ्युपगमादिति भावः । भाव
नीति । यद्यपि भाविन्यपि पक्षे लिंगस्य उ व्यवादेर्विद्यमानत्वमस्त्येव । तथापि स्वरूपेण
तस्य न लिंगत्वं किंतु पक्षवृत्तित्वमात्रत्वात् । तच्च तस्य तदानीं पक्षाभावादसंभवी व्याप्ति
नायेनोत दुक्तं । ननु व्यक्त्यैकमेवेयं संभवि । तत्समनियतस्य ज्ञानविशेषविशेष्यत्वादेर्लिंग
साधर्म्मोत्तरस्य सातरस्य संभवात् । न चायमेतदतिरिक्तयावदेतद्धर्मवानित्यत्रैतत्त्वे नि
द्विष्ट यत्किंचिद्विशेषस्यैव तत्र लिंगत्वं ॥ धर्म्मोत्तरस्य साध्यांतर्गतत्वेनालिंगत्वादिति वाच्यं ॥

प्रकारभेदेनोभयरूपत्वाविरोधात्। अत एव तोयत्वेन पिपासोपशमनसमर्थं ताव
च्छेदकरूपानुमानमित्यनुशये नाहंपदिद्द्वेति। वर्त्तमानतया संदिग्धादिति। अवर्त्तमा
नो इति शेषः। तथा च धूमस्य निश्चितत्वेपि न सत्वं ध्वंसादेश्च सत्वेपि न निश्चितत्वमि
त्येकस्यापि न हेतुत्वमभिप्रायः। यत्तु अतीतदिने वृत्तितया निश्चितस्य धूमस्य
वर्त्तमानदिनेतीतदिनवृत्तित्वरूपविशेषणध्वंसेन विशिष्टतत्ध्वंसस्य निश्चे
तुं शक्यतया तस्यैव हेतुत्वं स्यादिति। तन्न। विशिष्टध्वंसस्य घटादिध्वंसेन कल्प
[illegible]शक्यत्वात् यत्कृतेव निरूप्यत्वात्। न च तत्र घटादेर्विशेष्यस्य विद्यमानतया विशेष
णमात्रध्वंस एव स विशेषणेहीति न्यायात्। अत्र धूमस्य विशेष्यस्याप्रसत्वाद्विशिष्ट
ध्वंसः स्यादिति वाच्यं। एवमपि विशेष्यध्वंससंदेहे विशिष्टध्वंसस्य संदिग्धत्वादेव हेतु
त्वं न स्यात्। न हि विशेष्यसत्वेपि विशेषणध्वंसप्रयुक्तो विशिष्टध्वंस इति भावः॥ ननु

[illegible]त्प्रागभावादेः संदेहेपि न पर्व्वते तत्संदेहः प्रतियोगिसत्वेनैव तत्र तस्य निश्चयादिति व

तस्येतत्रवर्त्तमानत्वनिश्चयश्चास्तीति न व्यभिचार इत्यनुचेराह ॥ किं चेति । पर्व्वते धूम इति

[illegible]नादिति । वस्तुतो ऽतीतादिधूमविषयादितिशेषः । न तु धूमप्रागभावादौ न व्यर्थत्वं ॥

प्रागभावनिष्ठव्याप्तेर्द्धूमविशेषणं विनाग्रहात् ॥ यन्निष्ठा व्याप्तिर्यद्विशेषणं विनान

[illegible]ह्यते तस्यैव सार्थकत्वात् । एवं चाधिकसंग्राहकविशेषणस्य गुरुणोपि न व्यर्थत्वं । किं तु

[illegible]कावकविशेषणस्यैव । यथा नीलधूमादौ एवं च धूमासत्ताभावाभावत्वेपि न व्य

र्थत्वमिति पूर्व्वास्वरसादाह ॥ आवश्यकेति । प्रथमोपस्थितधूमज्ञानादेवानुमित्युत्पा

दसिद्धसाध्येनानुमित्यंतराभावात्तत्प्रागभावादेर्व्यर्थत्वमित्यर्थः । नन्वेवमप्यनुमि

त्सया यो प्रागभावादेरनुमितिजनकत्वं स्यादेवेत्यनुशायेनाह । किं चेति । कालिकव्या

प्यस्फुरणदशायामपि प्रकारांतरमाह । अथ वेति । यथा चैतत्तथा वाधग्रंथे वक्ष्याम-

॥ ८८ ॥

तथैवेति। ननु व्यापारवत्त्वेनैव न करणत्वं किंतु क्रियायाऽयोगव्यवच्छेदेन संबंधि करणमिति
चेत्॥ न॥ करणस्य कारकविशेषत्वात्। कारकत्वस्य च व्यापारगर्भत्वात्। किंचासद्ये दा क्रि-
यायोगव्यवच्छेदश्चक्षुरादावपि नास्ति। कदाचित्कर्म्मादावप्यस्तीति तस्यापि तत्त्वं स्यादिति॥
किंतु व्याप्तिज्ञानमिति। अत्र वदंति। यत्र विशेषे कश्चितानां व्याप्तिशरीरप्रविष्टसहचारादिपदा-
र्थानां स्मरणे सति विशेष्ये विशेषणं तत्र तद्विशेषणांतरमिति न्यायेन विशिष्टवैशिष्ट्याव-
गाहि परामर्शोत्पादादनुमितिस्तत्र परामर्शद्वारा व्याप्तिज्ञानस्य न करणत्वं संभवति। तत्पूर्वं त-
स्यासत्त्वात्। किंच यत्र स्मृतिरूपपरामर्शादनुमितिः। तत्रापि तदसंभवः। न च तत्र पूर्वानु-
भवरूपमेव व्याप्तिज्ञानं करणमिति वाच्यं। तस्यानुमित्युज्जनकीभूतसंस्कारेणैव व्यवहित-
त्वात्। व्यापारमात्रस्यैव करणाव्यवधायकत्वोपगमात्। अन्यथा यागादेः स्वर्गादिहेतु-
तारक्षार्थं तज्जन्यापूर्वस्य व्यापारत्वसिद्ध्यै स्वर्गजनकत्वकल्पनानापत्तेः। अत एवा

80

श्री

ढुःस्वांगमव्यवधायकमिति। नन्वेवं तत्रानुमितौ संस्कारोपि जनकः स्मृतित्वापत्तेः। अनुमित्यंतरस्य
पि वाराश्च। वस्तुतस्तु स्मृतिरूपपरामर्षे तज्जनकपूर्वानुभवस्य प्रत्यक्षस्य रूपरामर्षे च व्याप्ति
ज्ञानस्योपक्षीणत्वादन्यथासिद्धत्वमेव। अन्यथा स्मृतिजन्ये प्रत्यभिज्ञादौ पूर्वानुभवस्य
विशिष्टज्ञानजन्ये विशिष्टवैशिष्ट्यप्रत्यक्षादौ च विशिष्टज्ञानजनकविशेषणज्ञानस्यापिक
रणत्वापत्त्या बहुव्याकुलं स्यात्। अनुमितौ व्याप्तिज्ञानवत्परामर्षजनकविसेषणज्ञानस्य पक्षता
तावच्छेदकधर्म्मादिरूपविशेषणज्ञानमपि करणं स्यात्। न चानुमितौ करणांतरानुपप
त्त्या सर्वत्रानुमितिपूर्वं व्याप्तिज्ञानं तत्करणं कल्पनीयमिति वाच्यं। परामर्षरूपासाधारणव्या
पारद्वारा मनस एवासाधारणीभूय तत्करणत्वसंभवात्। तदुक्तं प्रमेयमोभाष्यादौ मनो
ऽक्षोणावसरे स्मृत्यनुमित्यादिकरणत्वेन मनः साधितमिति। तदपरे न क्षमंते। तथाहि।
अनुमितौ मनसः करणत्वे तस्या औपेक्षिकज्ञानवन्मानसाध्य[illegible]तापत्तिः। करणांतरास

सा०

हेतुत्वमनोऽनन्यत्वस्यैव मानसत्वनियामकत्वात्। न च परामर्श एव करणं तत्र मव्यापारकत्वात्।
तस्मात्परामर्शजनकज्ञानत्वेन व्याप्तिज्ञानादीनां सर्वेषां करणतातेन न कोऽनुपपत्तिः। मन
नव्यापारकश्रवणत्वादिनैव श्रवणादिप्रतिपत्तीनां मुक्तिकरणत्वं। न च विशेषणविशेषणज्ञा
नस्य विशिष्टवैशिष्ट्यावगाहिज्ञाने हेतुहेतुतया व्याप्तिज्ञानादीनामन्यथासिद्धिरिति वा
च्यं येन रूपेणान्यथासिद्धिस्तदन्येन हेतुत्वाविरोधात्। कुलालपितृत्वेनान्यथासिद्धस्या
पि कुलालपितुः कुलालत्वेन घटजनकत्वात्। तदिह हेतुहेतुत्वेनान्यथासिद्धत्वेऽप्युक्तक्रमेण
जनकत्वमविरुद्धं। न चैतत्र हेतुताग्राहकान्वयव्यतिरेको न विहेति वाच्यं। तदसत्त्वेऽपि क्रिया
याः करणजन्यत्वानुमानस्यैव परिशेषेण विशेषपर्यवसितस्य तद्ग्राहकस्य विद्यमानत्वा
त्। एतेन पक्षतावच्छेदकज्ञानमपि करणं स्यादित्यनिष्टापादनमपास्तं। उक्तरूपेणेष्टाप
त्तेः। न च स्मृतिरूपपरामर्शजनकं ज्ञानमिति व्यभिचारः। तज्जनकानुभवस्य सत्त्वात्। न च सं

पप२

४१

स्कारव्यवहितः स कथमनुमितौ हेतुरिति वाच्यं। अनुमितिं प्रति स्मृतिरूपपरामर्षेण स्मृतिरूपपु
रामर्षं प्रति संस्कारेणाव्यवहितपूर्ववर्त्तित्वसत्वात्। नहि यावान् व्यापारजनकः तावान् फलस्ये
ति नियमः। न च व्यापारजनकस्य फलाजनकतया तेन व्यवधानं। न तुः कर्म्मणः वस्तुः विष
यसंयोगजनकस्य साक्षात्काराजनकत्वेन व्यभिचारात्। अस्तु वा परामर्षजनकत्वे नैव
जनकतानतुज्ञानत्वं प्रविष्टं। तथा वास्तु संस्कार एव तत्र करणं। न चानुमितेः स्मृतित्वाप
त्तिः। संस्कारत्वेनैव जनकत्वे तथात्वादन्यथा लिंगकरणतापक्षे संस्कारलिंगकानुमि
तौ का गतिः। वस्तुतः समानविषयसंस्कारजन्यत्वेन स्मृतित्वमत एव संस्कारव्यापारत्वेत
समयोत्पत्तिकत्वं बाधकं वक्ष्यति। अन्यथा स्मृतित्वाप[illegible]स्य संभवादिति॥ अत्र ब्रूमः॥ ॥२०॥
विशेषणविशेषणज्ञानवत् परामर्षोपक्षीणानामपि पूर्वानुभवव्याप्तिस्मरणादीनां प
रामर्षजनकत्वेनानुमितिहेतुत्वमन्वयव्यतिरेकादिना कल्पनीयं। अनुमितौ करणांत

स्मृतित्वापत्तिरिति युक्तिसंभवात् फलकारस्येति
भावः।२

रानुपपत्त्या वा। नाद्यस्तद्भावात् परामर्षे सति तद्व्यतिरेकेणानुमितिव्यतिरेकासिद्धेः। ना
न्त्यः तथापि परामर्षपूर्ववर्त्तित्वेनैव हेतुत्वमस्तु ऽलाघवात्। न तु परामर्षजनकत्वेन नि
यमानन्यथासिद्धिघटितत्वेन तस्य गुरुत्वात्। तथा चाकाशादीनामपि तद्धेतुतापत्तिः। अव
च्छेदकलाघवे व्यक्तिगौरवस्यादोषत्वात् दोषत्वे वा परामर्शप्रागभावावच्छिन्नसम
त्वेनैव हेतुत्वमस्तु परामर्षपूर्ववर्त्तित्वापेक्षयाप्यस्य लघुत्वात्। तत्पूर्ववर्त्तित्वं हि तत्प्राग
भावावच्छिन्नसमयवृत्तित्वं। तथा च तत्प्रागभावत्वमेवावच्छेदकं परामर्षेणैवान्यथासि
द्धत्वात्प्रागभावस्य नानुमितिहेतुत्वमिति यदि तदात्रापि तुल्यं करणान्तरानुपपत्त्या तर्क
स्यानमुभयत्रापि तुल्यं। परामर्षजनकत्वेन हेतुपक्षे स्मृतिरूपपरामर्षजनकसंस्कारव
त्परामर्षप्रागभावस्यापि हेतुत्वाभ्युपगमात्। तथा च करणानुपपत्त्यापि तत्प्रागभावत्वेनै

82

कुं॰टी॰

वहेतुत्वं कल्प्यं न तु उ न कत्वे नातिगौरवात्। एवं च संस्कारस्य व्यवहितस्य पूर्वानुभवस्य वा तद्धु
न्य संस्कारस्य वा हेतुत्वव्यवस्थापन व्यापृत्तिर्न भवति।स्य परमप्यनुकूलं भवति। वस्तुतस्तु
तेऽप्रागभावस्यापि नानुमितिकरणत्वं। परामर्शेणान्यथासिद्धतया तद्धेतुत्व एव मानाभा
वात्। करणान्यथानुपपत्तिर्मानमिति चेत्। न। मनस एव तत्करणत्वसंभवात्। तथापि किं
विनिगमकमिति चेत्। नाम नसोनुमितिहेतुत्वस्य क्लृप्तत्वात्। परामर्शप्रागभावस्य च
तद्धेतुत्वे नाक्लृप्तत्वात्। प्रागभावत्वापेक्षया मनस्त्वस्य जातितया लघुत्वाच्च। नन्वेवमनुमि
तेर्मानसाध्यक्षत्वापत्तिः। करणान्तरासहकृतमनोजन्यत्वस्यैव तन्नियामकत्वादिति यु
क्तमिति चेत्। न। करणान्तरं हि प्रमित्यन्तरकरणमेव वाच्यमन्यथा यथाश्रुतेऽसंभवात्।
एवं च प्रमित्यन्तरासाधारणकारणासहकृतमनोजन्यत्वस्यैव मानसत्वनियामकत्वे
नानुमितेर्मानसत्वं। अनुमितिरूपप्रमित्यन्तरासाधारणकारणीभूतपराम

॥१७॥

षसहकृतं मनोऽन्यत्वात्। तदुक्तं शास्त्राधरे। न हि मनोऽन्यत्वेन मानसत्वं। किं त्वसाधारणका
रणासहकृतमनोऽन्यत्वेन न त्वानुमित्यादौ तथा। परामर्षादेरसाधारणस्यापेक्षानिय
मादिति। औत्प्रेक्षिकस्य च तथाभावान्मानसत्वमेव। ननूत्प्रेक्षया न प्रमितं तत्र रऽनक
त्वं परामर्षस्य तथात्वमित्यत्रैव किन्नियामकं निर्व्यापारत्वेनोभयोरविशेषादिति चेत्।
ना। सव्यापारत्वाविशेषेऽपि बुद्ध्यादेर्विजातीयप्र माजनकत्वे यत्तदेव। तत्र स्वभाव
एव शरणं फलबलेन तथेति चेत्। अत्रापि स एव। तत एव तथास्थितिर्न किंचिदेतत्। यद्वा
प्रमितित्वं तत्र प्रागभावासहकृतमनोऽन्यत्वं मानसत्वे प्रयोजकं लाघवात्। इन्द्रियत्वेन
मनोऽन्यत्वं वा तथा। प्रत्यात वैव संस्कारत्वेन तज्जन्यत्वं प्रयोजकमिति नोक्तदोषः। यत्तु
व्याप्तिप्रकारकपक्षधर्म्मताज्ञानत्वेन परामर्षस्यानुमितिहेतुत्वमिति व्याप्तेः प्रका
रत्वेन परामर्षपूर्वं तदुपस्थितेरावश्यकत्वान्न व्याप्तिवारोस्मरणलक्षणपरामर्षस्यत्वे

विशेष्ये२

पूर्वानुभवस्यैव करणत्वमिति यथाश्रुत एवायं ग्रंथः साधुरिति। तन्न। एवं व्यभिचारोद्धारेऽपि अन्य
थासिद्ध्यनुद्धारात्। किंच व्यभिचाराभावसहचारस्मरणानंतरं विशेषणं तत्र च विशेषणात्तर
मिति न्यायेन व्याप्तिविशिष्टविषयकपक्षधर्मताज्ञानादुत्पन्नानुमितेरनुभूयमानत्वान्न व्या
प्तिप्रकारत्वेन तस्य हेतुत्वमिति। विषयपरिशोधकस्य चेति। नन्वेतस्यानुमितौ कथमुपयो
गः। न च विरोधिशंकानिवृत्तिद्वारा सत्तथेति वाच्यं। परामर्शस्यैव विशेषदर्शनत्वेन तन्निव
र्तकत्वादिति चेत्। अत्राहुः। विशेषदर्शनेऽस्वरसवाहिनीशंकानोदयेऽन्यादृतोदये वाकु

॥१२॥

कथमन्यथा प्रामाण्यशंकादिनार्थनिश्चये सत्यपि च वसायार्थशंकोदयस्तोर्हि परामर्शा
नंतरं स्वरसवाहिनी साध्यविरहशंका निवर्त्तितां। बाधके प्रमाणाद्येवतारशंकानि बंधना
त्साध्याभावशंका कथं नोदेतु तदुक्तं गुणकिरणावल्यामाचार्यचरणैः विरोधिप्रमा
णसदसद्भावेशंकयामुद्रितमनुमितौ विलंबं तैनुमातारः इति। तथा च यथा धूमाद्वह्निम
तानेन भवितव्यं। तथा तु तच्छिद्रन्यभावसाधकाद्वह्निशून्येनैव न कुत इति शंका। तत्किंच

॥१२॥

ह्निविरहसाधककमितिजिज्ञासा साचा परामर्षेसत्यपिजायते। साचयदिनिर्वह्निः स्यान्निर्धूमः
स्यात्तथाचनवह्निविरहसाधकं किमप्यत्र। तत्सत्वेवह्निसाधकधूमानुपपत्तेरितितर्केणाप
नीयइतिविषयेपरि[illegible]शुद्धेप्रतिबंधकशंकाविरहादनुमितिरविकलाभवतीति। यत्रस्वतः
सिद्धःशंकाविरह[illegible]स्तत्रतर्कस्यापिनोपयोगइतिध्येयं। तत्रानुमानमिति अनुमानविष
यीभूतंलिंगमित्यर्थः। केवलान्वयीति। वक्ष्यमाणकेवलान्वयिधर्म्मसाध्यकमित्यर्थः। अ
सद्विपक्षमित्यस्यापत्रैवतात्पर्यं। यथाश्रुतेसिध्यद्धिव्याघातात्। [illegible]यत्वस्येति। अभिधे
यत्वस्यशब्दशक्तिविषयत्वस्यनविपक्षः आकाशत्वादेरप्या[illegible]काशादिपदशक्यस्यवस्तु
पदादिशक्यत्वादितिभावः। अभिधानइति। येनैवशब्देन तदभिधानं तत्पदशक्यदेवनविपक्षे ता२
त्वं अनभिधानेववस्तुपदेनाप्यनभिधेयतयावस्तुत्वादेवनविपक्षत्वमित्यर्थः। पदशक्यत्वे
[illegible]पिदपजन्यज्ञानविषयत्वाद्विपक्षत्वंवस्तुत्वंवस्त्वादित्याशंकते। अथेति। एवंचेति। उत्क्रमेण

सि५

४४

व्याघाते निरस्तादृत्यर्थः ॥ अन्यथा व्याघातादेवानुमानं बाधितं स्यादिति भावः । यद्धर्मसाध्यकं लिंगं के
वलान्वयि तद्धर्मं निरूपयति । तत्र नतावदिति । यत्रेत्यत्र [illegible] मेणात्यंताभावाप्रतियोगित्वमेव केवला
न्वयिधर्मलक्षणत्वेन तवाभिमतं तथा चाव्याप्तिरित्याशंक्यते । तत्रेति । यदीदं लक्षणं तत्र तदा
नायमत्यंताभावः केवलान्वयी स्यादित्यर्थः । ननु कः संग्राहद इत्याकांक्षायामस्यावतारो लक्षणा
नाक्षेपे तत्र सिद्धांतप्रणयनस्य विरुद्धत्वापातादिति । तन्न । नाप्याश्रयेत्यादिग्रंथस्यासं
गत्वापातादिति ॥ नेत्यापत्तेरत्यंताभाववद्वाश्रयनाशाद्यन्यगुणादिनाशात्यंताभावोपि केवला
न्वयित्वेन संग्राह्योयेन तत्राव्याप्तिराशंक्यते । न चोक्तलक्षणे व्याप्तिदुष्टव्यानो तिव्याप्तिरित्यभिप्रा

९३ ॥

येण ग्रंथावतार इति वाच्यं । लक्षणदूषयितुस्तत्रातिव्याप्तिमाशंक्य तन्निरासप्रयासस्यासंभव
दुक्तिवक्तव्यात् । अव्याप्तिवदति व्याप्तिसत्वेपि तद्दिष्टस्यैव सि[illegible]त्कर्णेनैवोपपत्तेश्च । न चैव
मग्रे लक्षणप्रणयनं विरुद्धं स्यादिति वाच्यं । इतिमदित्यादि केवलान्वयिलक्षणं । न हत्यंताभा

॥ ९३ ॥

वाप्रतियोगित्वमात्रं। तथा चाव्याप्यवृत्त्यत्यंताभाव आकाशात्यंताभावो वा केवलान्वयीवेति
नोक्तदोष इत्याशयेन तल्लक्षणयनात्॥ यथा चास्मिन्नुक्तलक्षणे नाव्याप्यवृत्त्यत्यंताभावसंग्रहस्त
थाग्रे वक्ष्यते॥ प्रतियोग्येवेति। न च प्रतियोगि प्रागभावादिरपि तथेति कथमवधारणं॥ तस्या
पि प्रतियोगित्वात्। घटात्यंताभावस्येव तत्प्रागभावात्यंताभावत्वादिति भावः॥ प्रतियो
गीति॥ प्रतियोगितावच्छेदकरूप इत्यर्थः॥ वृत्तिमदिति वृत्तिमान्योऽत्यंताभावस्तदप्रति
योगित्वमित्यर्थः॥ नन्विदानीमाकाशमिति प्रत्ययादाकाशस्यापि वृत्तिमत्वात्तदत्यंताभावे
तथाप्यव्याप्तिः॥ न च वृत्तिः संयोगः समवायो वा विवक्षित इति वाच्यं॥ घटादेरपि केवलान्वयित्वा
पत्तेः। अव्याप्यवृत्त्यत्यंताभावे व्याप्तेश्चेति चेत्। न। स्ववृत्तिविरोधिवृत्तेर्वृत्तिपदेन विवक्षितत्वात्॥
स्ववृत्तिविरोधित्वं च स्वसामानाधिकरण्यविरोधित्वं। संयोगादिवृत्तिश्च न तदत्यंताभाववृ

85

कु॰अ॰

त्तिविरोधिनिति न तत्राव्याप्तिः॥ नन्वेवं संयोगस्यापि केवलान्वयित्वापत्तिः। तदत्यंताभाववृत्तेरपि तद्वृत्तिविरोधित्वाभावात्। वृक्षादावुभयोः समानाधिकरणत्वादिति चेत्। न। कर्म्मादावधिकरणे तदत्यंताभाववृत्तेरपि त[illegible]द्वृत्तिविरोधित्वात्। यद्यपि संयोगवृत्तिरपि स्वावच्छेदेन स्वात्यंताभाववृ त्तिविरोधिनी भवत्येव तथा चैतत्राव्याप्तिरेव। तथापि स्वसामानाधिकरण्यधीविरोधित्वं नास्ति॥ संयोगावच्छेदेन तदत्यंताभावासत्वेपि तत्सामानाधिकरण्यबुद्धेरप्र[illegible]हत्वात्। नन्वेवं मेयत्वा दिवृत्तिविरोधि[illegible]वृत्तेरप्रसिद्धेस्तत्राव्याप्तिरिति वाच्यं॥ स्ववृत्तिविरोधिवृत्तिमदत्यंताभाव प्रतियोगिनो घटादयः प्रसिद्धास्तदन्यत्वस्य तत्रापि सत्वात्॥ ननु तथाप्याकाशात्यंताभावः कथं केवलान्वयी। कालादौ तस्य सत्वेन तदत्यंताभावासत्वात्। न च संयोगित्वेन तदत्यंताभा वस्तथाभूत कालादौ संयोगित्वेनापि घटादिवत्तस्य सत्वेन तदत्यंताभावासत्वात्। न चाकाशसं

॥९४॥

योगस्य भूतलादिवृत्तित्वेप्याकाशं तत्र न वर्त्तत इति वाच्यं॥ एवं घटादेरपि भूतलादिवृत्तित्वं न
स्यात्। नापि समवेतत्वेन तदत्यंताभावस्तथा॥ व्यधिकरणधर्म्मावच्छिन्नप्रतियोगिकाभावा
भ्युपगमापत्तेरिति चेत् नाइदानीं भूतले घट इति वदिदानीं भूतले आकाशमित्याधारा
धेयप्रतीतेरसिद्धेर्न तत्र संयोगित्वेन तस्य सत्वं। तथा च तदवच्छिन्नाभाव एव तस्य केवला
न्वयी स्यादुः॥ अन्ये तु॥ अस्तु संयोगेनाकाशस्य भूतलादौ सत्वं। तथापि समवायसंबंधावच्छिन्ना
काशात्यंताभाव एव केवलान्वयि। न चैवं व्यधिकरणधर्मावच्छिन्नाभावाभ्युपगमापत्तिः। आका
शत्वावच्छिन्नप्रतियोगिकस्यैव तस्यारोप्येण समवायसंबंधेनाभावाभ्युपगमात्। आरो
प्यसंबंधभेदेनैवाभावभेदात्। न चाकाशसमवायाप्रसिद्ध्या तदारोपोपि कथमिति वाच्यं॥
सर्वत्र वैशिष्ट्यस्याप्रसिद्धस्यैवारोप्यत्वात्। न हि घटो नास्तीत्यत्र भूतले घटसंयोगोपि प्रसि

द्धः। तथारोप्यारोपविषयप्रसिद्ध्या तदुभयसंसर्गोऽप्रसिद्ध एवारोप्यते॥ यथावाऽन्योन्याभावे
तदुभयप्रसिद्धिमात्रेण तदुभयतादात्म्यं तथात्रापीनकाप्यनुपपत्तिः। यदि च संबंधभेनाभावभे
दो नाभ्युपगम्यते तदा आत्माद्इतरेभ्यो भिद्यते ज्ञानादिति व्यतिरेक्यनुमानं सर्वसिद्धं न स्यात्॥
विषयविषयिभावसंबंधेन ज्ञानस्य वस्तुमात्रवृत्तितया ज्ञाना[illegible]वत्वाभावाप्रसिद्धेः। तस्मा
[illegible]था घटादौ विषयविषयिभावेन ज्ञानसत्वेपि समवायेन तदभावः तथा तत्र संयोगादिना
काशसत्वेपि समवायेन तदभावः स्यात्॥ येन संबंधेन यदभावस्तत्संबंधेनैव तत्सत्वस्य
तदत्यंताभाववृत्तिविरोधित्वात् तस्माद्व्यधिकरणधर्मानारोप्यतावच्छेदकीकृत्या[illegible]भावभे
दकः आरोप्यसंबंधोपलक्षिता[illegible]भेदक एवेति विभा[illegible]ः। एवं च येन संबंधेन यस्य न वृत्तित्वात्संबं
धावच्छिन्नतदभावः केवलान्वयीति परमाण्वाद्यत्यंताभावोपि तत्वेनेष्ट एवानन्वेवं मेयत्वाद्य

ग

॥९५॥

भावस्यापि केवलान्वयित्वेनाभ्युपगमे तदप्रसिद्धिनिबंधनाऽव्याप्तिवारित्वलक्षणे केवलान्व
य्यव्याप्तिः पूर्वोक्ता विरुद्ध्य तदिति चेत्। न। व्याप्तिशरीरप्रविष्टसंबंधावच्छिन्नसाध्याभाव
वद्वृत्तित्वमव्यभिचारित्वेन तत्राभिमतं। अन्यथा समवायावच्छिन्नवह्न्यभाववद्वृत्तित्वाद्धूमेपि
वह्न्यव्यभिचारानुपपत्तेः। तथा च मेयत्वस्य समवायावच्छिन्नाभावप्रसिद्धावपि यत्र वाच्यत्वं
नत्वं प्रमेयत्वमिति व्याप्तिशरीरप्रतिष्ठस्वरूपसंबंधावच्छिन्नसाध्याभावाप्रसिद्ध्या तत्राव्या
प्तिसंभावात्। एवं वृत्तिमत्पदस्याप्रसिद्धिवारकतया न व्यर्थत्वसंकापि। अव्याप्तिवारकत्वे
हि सापि स्यात्। वस्तुतस्तु तत्रापि न व्यर्थत्वमित्यक्रमेंद्रियलक्षण इत्याहुः॥ वयं तु ब्रूमः॥ अ
न्योन्याभावप्रतियोगितानवच्छेदकधर्म्मत्वं केवलान्वयित्वमन्योन्याभावो व्याप्यवृत्तिरेवेति
ना व्याप्यवृत्तित्वं ताभावेऽव्याप्तिरिति। एतच्च केवलान्वयिधर्म्मलक्षणं। तद्धर्म्मसाध्यकत्वेन

87

श्री

॥ १६॥

केवलान्वयिलिंगलक्षणं बोध्यं। तेनायं प्रमेयो घटत्वादित्यादावपि नाव्याप्तिः सर्वसाधारणान्व
यिनोऽ[illegible]त्र लक्ष्यत्वादृशा विशेषान्वयिधूमाव्याप्तिर्न्न दोष इति ध्येयं सदनुमानविभागोयमित्य
यं घटः प्रमेयत्वादित्यनुमानाभा[illegible]सस्योक्तत्रयबहिर्भावेपि न क्षतिरिति बोध्यं। तथेति॥ आदिप
दात् दिगन्त्यंताभावादिपरिग्रहः। ननु प्रमात्वपरंपरासंबंधे घटः प्रमेतिधीः स्यान्न तु प्रमेयमिति
विशेषणस्यैव प्रकारकत्वान्न संबंधस्येत्यरूचेराह॥ प्रमाडीतीयेति॥ यद्यप्यस्मन्मते ईश्वरप्रमा
एवैव व्यक्ति[illegible]स्तद्विषयत्वमनुगतमेव तथाप्युभयमतसाधारण्यादेतदुक्तं॥ भिन्नेति। स च न प्र
प्रयोजकोतिप्रसंगादिति भावः॥ असत्वेति॥ घटास्तित्वेत्यर्थः॥ तस्यैवांशं संशयकोटित्वादिति
भावः॥ साध्यसिद्धीति॥ साध्यसिद्धिर्विरोधिनी यस्य साध्यसिद्धिप्रतिबध्य इति भावः॥ समानवि
षयत्वमिति॥ समानविशेष्यकत्वमित्यर्थः घनगर्जितादावप्यनुमितेः संशयस्यनानुमित्यंगत्व

॥ १६॥

९

मित्य भिप्रायेणाह॥ यद्वेति। पक्षेति॥ नचैतदज्ञानदशायां पक्षे साध्यवत्त्वग्रहदशायामुक्तयोग्यतासत्वे नानुमित्यापत्तिः॥ पक्षनिष्ठात्यंताभावप्रतियोगित्वज्ञानविरोधिज्ञानाभावस्यैवयोग्यतात्वमित्याशयात्॥ अन्ये त्वत्रास्वरसबीजं। एवमपि प्रमेयत्वेत्यंताभावप्रतियोगित्वप्रसिद्धावपि प्रमेयो न वेति संशयकोटीभूतात्वंड प्रमेयत्वाभावस्याप्रसिद्धिरेवेति॥ यदि नाद्दशो ऽत्र मस्तदा तत एव न केवलान्वयित्वमन्यथा संदेहाभावएवेत्यादि तद्बीजमित्याहुः॥ एकरूप विकलमिति॥ विपक्षे व्यावृत्तत्वविकलमित्यर्थः॥ अन्वयव्यतिरेकिणि तन्निश्चये नगमकत्वदर्शनादि ...भावः॥ रूपांतरेति॥ पक्षवृत्तिता दीत्यर्थः॥ अन्वयेति॥ तत्रैकव्याप्तिनिश्चयादप्यनुमितिदर्शनादन्यत्रान्वयव्याप्तिनिश्चये सति व्यतिरेकव्याप्तिनिश्चयप्रयोजकस्य विपक्षव्यावृत्तत्वस्य ...भावः॥ नन्वन्वयव्यतिरेकिणि अन्वयव्याप्तिप्रतिनो विपक्षव्यावृत्तत्वस्यापि प्रयोजक

४४

कुजो

तदर्शनात्तेन विनान्वयव्याप्तिनिश्चय एवात्र न स्यादित्यत आह ॥ व्यतिरेकश्चेति ॥ अन्वयव्या
प्तिप्रतीताविति शेषः ॥ व्यतिरेकव्याप्ताविति सति सप्तमी तथा च व्यतिरेकव्याप्तौ सत्यां विपक्ष
संभवे तद्वृत्तित्वशंकानिवृत्तिद्वारा विपक्षाव्यावृत्तत्वम न्वयव्याप्तिप्रतीतावुपयुज्यते ॥
न तु साक्षात् तथा चात्र स्वतःसिद्धे तादृशशंकाविरहे तन्निवृत्तिप्रयोजनकस्य न कोप्युप
योग इति भावः । असत्सपक्ष इति ॥ सिध्यसिद्धिपराहत इति तदर्थमाह ॥ यत्रेति ॥ व्यतिरेकेति ॥
व्यतिरेकसहचारमात्रेणेत्यर्थः । देशाविशेषधूमादेः केवलव्यतिरेकित्वमिष्टमेवेति भावः ॥ व्य
एकेति प्रत्यक्षाद्यन्यतरत्वेन चतुर्णामेकजातीयप्रमाजनकत्वसंभवादिति भावः ॥ व्यतिरेकि
साध्य इति ॥ अनुमितित्वप्रयोज कसामान्यसामग्र्यभावादिति भावः ॥ अयेति । वृत्तिमत्वेन वि
शेषणान्ना वृत्तौ व्यभिचारः ॥ एवं सति भेदकमाह ॥ एवमिति ॥ निरुपाधिकेति ॥ साध्यसा

९७ ॥ ९७ ॥

घन॰व्यतिरेकसहचारेणसाध्यानुमित्यनुकूलान्वयव्याप्तिरेवगृह्यतइत्यर्थः॥नन्वत्रापिव्यति
रेकव्याप्त्युपन्यासेऽर्थान्तरमितिचेत्ननियतव्यतिरेकसहचाररूपायास्तस्याअन्वयव्याप्ति
ज्ञानार्थमेवोपन्यासात्॥अन्वयव्याप्तिज्ञानंचपरस्यमानसमेव॥नह्यन्वयव्याप्त्युपन्यासेपि
शाब्दमेवतज्ज्ञानमनुमितिजनकं॥वादिवाक्यस्यनिर्णयाजनकत्वात्॥तथाचयत्रान्वयस
हचारसंभवस्तत्रान्वयज्ञापनायनियतान्वयसहचाररूपासैवोपदर्श्यते॥यत्रतदसंभ
वः॥तत्रतदर्थंनियतव्यतिरेकसहचाररूपाव्यतिरेकव्याप्तिरेवेतिविवेकः॥नचैवंनिय
मांशोपन्यासायवीप्सावैयर्थ्यमितिवाच्यं॥तस्यव्यभिचाराभावप्रदर्शनपर्यवसन्नतयाप
रस्यव्यभिचारज्ञाननिवृत्तावुपयोगात्तस्याअपिव्याप्तिग्रहोपयोगित्वात्॥नचैवमप्रा
माणिकत्वाल्लिंगाभावेनैवव्यतिरेकसहचारस्यान्वयव्याप्तिग्रहहेतुत्वात्॥लिंगाभावेने

87

श्री

ज्ञापकस्य ज्ञाप्यमनुपन्यस्योपन्यासेऽनाकांक्षिताभिधानत्वेनाप्राप्तकालत्वात्॥ अत एवोपा
धिज्ञानादौ विस्याव ऽङ्गितमानसमपि व्यभिचारज्ञानं संभवतीति ज्ञाप्यव्यभिचारमनुपन्यस्यो
पाधिरूपन्यस्यत इति सिद्धांत इति भावइत्याहुः॥ ननु व्यतिरेकसहचारेण यद्यन्वयमात्रव्याप्ति
ज्ञानं जन्यत इति मतं तदान्वयमात्रसहचारज्ञानजन्यादन्वयव्याप्तिज्ञानतस्तस्य वैलक्षण्यमा
वश्यकं तद्विलक्षणहेतुजन्यत्वात्॥ विषयकृतं च तत्र नास्तीति जातिरूपमेव वाच्यं॥ तच्च न संभ
वति चाक्षुषत्वादिना संकरापत्तेः॥ यदि चान्वयव्यतिरेकोभयविधव्याप्तिज्ञानं तेन जन्यत इति मतं
तदान्वयव्यतिरेकोभयसहचारज्ञानजन्यतदुभयव्याप्तिज्ञानतस्तस्य तुल्यविषयतया जा
तिरूपमेव वैलक्षण्यमभ्युपेयं तदपि न युज्यते चाक्षुषत्वादिनैव जातिसंकरापत्तेः॥ न च व्य
भिचारज्ञानविरोधिसहचारज्ञानत्वेनोभयसहचारज्ञानस्य हेतुत्वेन हेतुवैलक्षण्याभावान्न
तत्र वैजात्यमिति वाच्यं। सहचारस्य तज्ज्ञानस्य वाव्यभिचारज्ञानविरोधित्वाभावात्॥ तत्सत्वे

॥९८॥

पिवह्न्यादौ धूमादिव्यभिचारोपलंभादिति चेत्॥ नस्वाधिकरणनिष्ठव्यभिचारज्ञानविरोधिसहचा
रज्ञानत्वेनोभयस्य हेतुत्वात्॥ यत्राधिकरणे साध्यसाधनयोस्तद्भावयोर्वा सहचारग्रहस्तत्र
हेतुसाध्याभावसामानाधिकरण्यात्मकव्यभिचारज्ञानस्य सर्वथैवासंभवात्॥ ननु व्यतिरेक
सहचारेणान्वयव्याप्तिज्ञानं व्याप्तिविशेषणकं लिंगविशेष्यकं वाऽन्यतेरत व्यभिचाराभा
वविशेषणकसहचारविशेष्यकं वा॥ नाद्यः। तत्पूर्वमन्वयव्याप्तिज्ञानाभावात्॥ लिंगेंद्रियसन्नि
कर्षाभावाच्च॥ नांत्यः। विशेषणज्ञानं विशेष्येंद्रियसन्निकर्षं च विना तद्ग्राह्यभानात्॥ व्यति
रेकसहचारज्ञानमात्रकाले तयोरभावादिति चेत्॥ न॥ अंत्यपक्षस्यैव युक्तत्वात्॥ इतरेसाम
ग्र्याः सत्त्व एव तस्य व्याप्तिग्राहकत्वाभ्युपगमात्॥ विशेषणज्ञानादिसत्वेऽन्वयसहचारज्ञानेपि
ततो व्याप्तिग्रह इत्येवाभिमतं न तु तद्व्यतिरेकेपीति तस्यान्वयसहचारज्ञानस्थानाभिषिक्तत्वात्॥

अन्यथाइतकारणविरहे ततो न व्याप्तिनिश्चय इत्यन्वयसहचारज्ञानस्यापि तद्धेतुत्वं न स्यात्॥ अन्व
यति॥ उभयसहचारज्ञानादन्वयव्याप्तिरेव गृह्यत इति मतावष्टंभेनेदमुक्तं। एवमन्वयव्याप्तिग्र
हे॥ पक्षतावच्छेदकांतरप्रतीत्यनियमात्प्रकारांतरमाह॥ पृथिवीत्वमिति॥ येषां केवलव्यतिरेकि
ण्यभावरूपं साध्यमप्रसिद्धमपि सिध्यति अन्वयव्याप्तिज्ञानजनकविशेषणज्ञानादिविरहे
पि व्यतिरेकव्याप्तिज्ञानादेवानुमित्युत्पादाभ्युपगमस्तेषां मते न प्रकारांतरमाह॥ यद्वेति॥ तो
याचपूर्वोक्तरूपेण व्यतिरेकसहचारस्य विशेष्यसन्निकर्षादिसत्वेऽन्वयव्याप्तिज्ञानहेतुत्वं त
दसत्वे च व्यतिरेकव्याप्तिज्ञानहेतुत्वमेव तस्येत्यनियम एव न तु पूर्वोक्तरसेनैवायं क्रम इति ध्ये
यं। व्यतिरेकव्याप्तेरिति पंचम्यंतं॥ साध्याभावेति। अत्र प्रयोगितावैयधिकरण्यावच्छेदका
वच्छिन्नः सन्यो भावः प्रतियोगिवैयधिकरण्यावच्छेदकावच्छिन्नस्य साध्याभावस्य व्या

वायुःरूपवान्नसंयोगविशेषात्तदित्यत्र साध्यासहचरितत्वाभिप्रायेण निरूढत्वं ध्येयं॥ २

पकस्य सत्त्वप्रतियोगित्वं व्यतिरेकिणि गमकताप्रयोजकत्वे नाभिमतं॥ अन्यथा रूपादि विरुद्धसं
योगादेः रूपादिगमकतापत्तेः॥ संयोगे साध्ये द्रव्यत्वादेरन्वयव्यतिरेकित्वाव्याप्तेश्च॥ अ
केवलान्वयि साध्यक हेतोश्च तत्त्वेनावश्यं संग्राह्यत्वात्॥ अन्यथा तस्य त्रितयबहिर्भावाप
त्तेः॥ नन्वेवमपि विभागव्यक्तिविशेषाभावस्य संयोगव्यक्तिविशेषाभावगमकत्वं न स्या
त्॥ तत्र संयोगरूपसाध्याभावस्य प्रतियोगिसामानाधिकरण्यनैयत्येन निरूपकस्य गम
कताप्रयोजकस्य तत्रासंभवादिति चेत्॥ न तस्य केवलान्वयित्वेन व्यतिरेकितया असं
ग्राह्यत्वादित्याहुः॥ एवं हि यत्र संयोगव्यक्तिविशेषस्तत्र विभागव्यक्तिविशेष इति व्यतिरेकव्या
प्तिप्रमायां तत्संयोगाभावविभागाभावयोर्गम्यगमकभावः कथं स्यादुक्तरीत्या तस्य व्य[illegible]
तिरेकित्वाभावात्॥ अन्वयव्याप्त्यस्फुरणदशायां केवलान्वयित्वेनागमकत्वाच्च। न च तस्य

गु॰ ॐ॰

म

तदा अगमकत्वमिष्टमेवेति वाच्यं॥ एवं यत्र वह्निविरहस्तत्र धूमविरह इति व्यतिरेकव्याप्तिग्रहे धू
मस्यापि वह्निगमकतानापत्तेः अविशेषादिति प्रश्ने ताद्दशव्यतिरेकव्याप्तिग्रहस्य रूपादिवि
रुद्ध संयोगविशेषादिसाधारणतया अनन्यगत्या गुरोरपि निरूढस्य गमकत्वे तस्य चात्रासंभवा
त् तदा तदगमकत्वं तस्येष्टमेव। अत एव धूमस्यापि निरूढत्वा नादेवागमकत्वे वह्नेः॥ नान्यथेत्यु
त्तरं प्रतिभातीति दिक्। अत्र चाप्रसिद्धसाध्यकव्यतिरेकिणि साध्यरूपप्रतियोगिव्यधिकरण
त्वेन साध्याभावस्य कथं ज्ञानमिति चिंत्यं॥ अनुमितिमात्र इति॥ यद्यपि व्यतिरेकिणि व्यापक
ताज्ञानमात्रं हेतुर्न तु व्याप्तिधीरपि तथापि तस्य व्यतिरेकव्याप्तिविषयतयैव हेतुत्वं अन्वयव्या
प्तिज्ञानेन तु व्यापकतामात्रं अन्यथाऽन्वयिन्यपि व्यापकताज्ञानमेव हेतुः स्यात् यथा चात्रैने
ष्टापत्तिस्तथोक्तं॥ ननु तथापि व्याप्तिज्ञानत्वमतिप्रसक्तमिति स्वव्याप्तिज्ञानत्वेन हेतुत्वं वाच्यं॥

= यत्तु प्रतियोगिव्यधिकरणस्वसमानाधिकरणात्यंताभावप्रतियोग्यप्रतियोगिकत्वेन साध्याभावोविशेषणीय इति तन्न। व्यतिरेक्याभासोद्धे =
= दापत्तेः। न च तत्त्वेन ज्ञानं गमकताप्रयोजकं तत्त्वके विभ्रमात्क विभ्रम इति वाच्यं। तत्त्वेन ज्ञानं व्याप्तिरत्ना नविरोधी नवा। आद्ये व्यतिरेके सहचार =
= मात्रविषयत्वे तयैवागमकतोपपत्तौ नियमाद्यर्थं वैयर्थ्यं॥ अंत्ये भ्रमदशायां रूपादिविरुद्धत्वेन ज्ञातस्य संयोगविशेषस्यागमकतापत्तेरिति। =

॥१००॥

तोऽन्वयव्यतिरेकव्याप्तिसाधारणमिति चेत्॥ न॥ स्वनिष्ठव्यभिचारधीविरोधिधीविषयकव्या
हेतु प्तिज्ञानं हेतुत्वात्॥ एवं च यद्यपि परामर्शद्वयस्याप्यनुगमयितुं शक्यत्वात्तस्यानुमितिमात्र एव हेतुत्व
संभवा द्विशेषद्वयाभिधानं व्यर्थं तथापि व्यतिरेक्यनुमितौ व्याप्यतावच्छेदकावच्छिन्ना
भावविषयत्वं॥ अन्वयानुमितौ व्यापकतावच्छेदकावच्छिन्नविषयत्वमनुभूयत इति फलभेदे
आवश्यके सामग्रीभेदो आवश्यक इत्यभिप्रायेण तदभिधानं॥ अत एव टीकादौ नेदं निरासके
जीवच्छरीरमेत्येवानुमित्याकारप्रदर्शनमिति भावः॥ अतिप्रसंग इति॥ पक्षधर्मताज्ञानं विना
पि व्याप्तिग्रहमात्रादनुमित्यापत्तिरित्यर्थः॥ अन्वयीति॥ अतिप्रसंगस्थल इति शेषः॥ पक्षत्वमि
ति॥ संदेहघटितपक्षत्वमित्यर्थः॥ नन्वेवं अनवगममात्रेणानासाधारण्यं किंतु तद्व्याप्त्याद्यग्रहेणेन
त्यपरितोषादाह॥ किंचेति॥ वैधर्म्यमित्यस्यैव विवरणं अन्यादीति॥ वैधर्म्येति॥ पृथिवीत्वस्य

७२

न तु तेजोभिन्नेष्वष्टादिद्वादशभिन्नत्वकल्पने संशयेनापि विषयीकर्त्तव्यं न स्यात् पूर्वमसिद्धेः तज्ज्ञानके विशेषणज्ञानाभावादित्यत आह। २

त कु अ

हेतौ वैधर्म्यरूपत्वादिति भावः॥ तथापीति॥ किमितस्याप्रसिद्धेरिति भावः॥ आचार्यमतं शंकते॥ अथेति॥ एकेति। एकविशेषणविशिष्टत्वयोपस्थितत्वदुत्यर्थः॥ यद्वेति॥ अत्र त्रयोदशत्वमविवक्षितं सम्मुहाष्टंबनीभूते कसंशयेपि तावद्भेदानां प्रत्येककोटित्वसंभवादिति ध्येयं॥ यद्विवत्रयोदशसंशयास्तदा पूर्वपूर्वसंशयोपस्थितभेदविशिष्टत्वेनोपस्थितेधर्मिण्यं तिमसंशये न तावद्भेदसमुदायो विषयी क्रियत इति द्रष्टव्यं॥ एकाधिकरण्येन तावद्भेदोपस्थितये न कसंशयानुसरणं॥ अन्यथा कोटिप्रसिद्धिं विना संशयस्याप्रसिद्धेर्निश्चयरूपापि तावद्भेदरूपसाध्यप्रसिद्धिर्भवत्येव॥ ऐकाधिकरण्यविशिष्टतावद्भेदसाधनं चासाधारण्यनिरसनार्थं जलादेर्विपक्षत्वसिद्ध्या व्यतिरेकव्याप्तिग्रहार्थं च॥ अन्यथा तेजो वायवादि द्वादशभेदस्य जलादावपि सत्त्वेन त्रयोदशभेदाभावस्य तत्रासत्त्वेतदसंभव

॥१०१॥

॥१०१॥

एवस्यात्॥ व्यासज्यवृत्तिधर्मावच्छिन्नप्रतियोगिकाभावानभ्युपगमात्॥ प्रत्येकभेदसाधनेचा
साधारण्यात्। तथा चैकाधिकरण्यावच्छिन्नत्वरूपविशेषणाभावाद्विशिष्टाभावसत्वेन तस्य
विपक्षत्वान्न तदसंभव इति भावः॥ संवलितेति॥ एकाधिकरण्यावच्छिन्नानामिति भावः॥
साध्यनिश्चय इति॥ अत्र वदंति॥ पृथिव्यां जलादित्रयोदशभेदसंशये सति न जलेतरसंशयः
तत्र जलभेदाभावस्यैव ग्रहात्॥ एकदेशाविरहनिश्चयस्यापि समुदायसंशयविरोधित्वात्॥ न
नुमास्तु तत्र तदा तत्संशयः तद्व्यतिरेकनिश्चयोपि तत्र न स्यात्प्रतियोगिनिश्चयस्याभावनिश्च
यहेतुत्वात्॥ तथा च कथं व्यतिरेकव्याप्तिग्रहः स्यादिति चेत्॥ न॥ लाघवेन प्रतियोगिनो [illegible]त्वेन
तस्य तद्धेतुत्वात्॥ पृथिव्यां जलादित्रयोदशभेदसंशयेपि जलं न जलादिभेदवदिति निश्चयस्या
नुभवसिद्धत्वाच्च॥ न च तद्ग्राहकमानाभावः संशयरूपायामेव समुदितत्रयोदशभेदाभावप्रसि

93

अ तद्देहमेत्राभाववत्तद्वत्तया। अस्मर्यमाणत्वात् यद्यद्वत्तया न स्मर्यते तत्तदभाववत् इत्यत्र प्रकृतसाध्यहेत्वोः सहचा
र्या अनुमितिः तथा प्रकृतेपीति भावः॥४ ग्रहविनाश्य

द्वौसत्यां जलं जलादित्रयोदशान्यभेदाभाववत्॥ तदेकदेशीभूतजलभेदाभाववत्त्वात्॥ यद्यत्स
मुदायैकदेशाभाववत्॥ तत्तत्समुदायाभाववदिति सामान्यव्याप्तिमूलकस्यानुमानस्यैव तत्र
संभवात्॥ न हि सामान्यव्याप्तिमूलकेप्यनुमाने प्रकृतसाध्यहेत्वोः सहचारग्रहापेक्षा॥ यथा त
देहमेत्राभाववदित्यत्र वस्तुतस्तत्रोक्तसंज्ञायानंतरं त्रयोदशभिन्नत्वस्य तदभाववत्त्वनिश्च
॥१०२॥ यविषयत्वमपि न दुर्लभं तदनुव्यवसायरूपेणैव निश्चयेनैतत्प्रकारकत्वेनोभयोरपि विष
यीकरणात्॥ अत्राहुः। यत्र ह्यां सामान्यतो व्याप्तिरनुगतव्याप्यतावच्छेदकाभावान्नानुमानं
गमितिग्रंथकृतैवोक्तत्वादुक्तानुमानं न व्यतिरेकनिश्चायकं॥ प्राञ्चः नास्तितानुमानमपि तद्वत्तया
अस्मर्यमाणत्वहेतोरन्वयप्रतीतौ व्यतिरेक्येव तदुभयानवतारे प्राक्तनीति बुद्धेरसिद्धेः॥ एवमनु ॥१०२॥
व्यवसायेन निश्चयरूपा प्रसिद्धिरिति तन्न। यादृशो हि निश्चयो व्याप्तेर्ग्राहकोऽनुव्यवसायस्य

तथात्वाभावात्॥ विषयविशेषणीभूतधर्मग्रहस्य व्याप्तिधीहेतुत्वात् अनुव्यवसायेन तु तज्ज्ञानवि
शेषणत्वेन तदवगाहनादिति। वस्तुतस्तद्भेदसमुदायाभावरूपस्यापि साध्यस्याप्रसिद्धिरेवेति नो
क्तानुमानं संभवति न च संशयरूपैव तत्प्रसिद्धिरिति वाच्यं। तत्समुदायस्य तदभावस्य वा प्रसि
द्धत्वे न संशयकोटितासंभवात्। प्रसिद्धत्वे वा तत एव व्यतिरेकव्याप्तिनिश्चयसंभवात् उक्तानु
मानवैयर्थ्यापत्तेः। त[illegible]स्मादन्वयव्यतिरेके वा संशयरूपा साध्यप्रसिद्धिर्नांगं कोटिप्रसिद्धौ नि
श्चयरूपाया एव तस्याः संभवात् तत्प्रसिद्धौ संशयस्याप्यसंभवात्। न च ऐकाधिकरण्येऽपरिच्छि न तावद्दोः
तये संशयासरणमिति वाच्यं। संसर्गविधयाऐकाधिकरण्योपस्थितावपि व्यापकतावच्छेदकप्र
कारेण संशयादर्श्यनुपस्थितेरिति भावः। योग्यानुपलब्धेरिति॥ ऐंद्रियकस्य प्रतियोगिनोनुपस्थि
तेरित्यर्थः॥ नयनेति॥ तत्प्रतीतौ नयनोन्मीलनानंतर्यस्येत्यर्थः॥ प्रतियोगीति। मनोन्योन्याभा

एवंच

अ

वत्त्वमनस्यात्यंताभावोपि घटे प्रत्यक्ष एव तत्रापि प्रतियोगिसत्त्वविरोध्यनुपलब्धेरसंभवात् त
द्विशिष्टत्वेनैवाभावस्य योग्यत्वादिके विचिन्त्‌॥ अन्ये तूपलंभो तादृशोभावमवश्यग्राहयत्येवेति
न नियमः। प्रतियोगिज्ञानाभावे अभावग्रहानुदयात् किंत्वभावग्रहकारणप्रतियो[गिज्ञाना]दिसत्
ति योग्यमभावं ग्राहयतीति न स्वात्यंताभावस्तु न योग्यः योग्यप्रतियोगिकस्यैव संसर्गाभावस्य
योग्यत्वात्। अतो घटे सन्न गृह्यते। रूपवदन्योन्याभावस्तु योग्यप्रतियोगिकोपि वायावधिकरणे
योग्यताविरहान्न गृह्यते। अन्योन्याभावग्रहे तस्याः प्रयोजकत्वात्। अत एव संसर्गान्योन्याभा
वग्रहे प्रतियोग्यधिकरणयोग्यतातंत्रमिति सिद्धांत इत्याहुः। अनयोः कल्पयोरन्त्यएव विनिग
मक इति ध्येयं। अनुपलब्धिश्च यादृशस्य भावोपल[ब्धि]प्रसंगं तादृशी प्रपंचिता प्रत्यक्षप्रकाशे। न
[लभ्य]ते॥ न चैंद्रियकानुपलब्धिमात्रमित्यर्थः॥ न च अधिकरणे प्रतियोगिसत्त्वस्यापसिद्धा तन्नि

॥१०३॥

ज्ञाना

योग्य

रूपितविरोधित्वस्यासंभवात् दुःखानुपलब्धिरसिद्धेत्यत आह॥ अधिकरण इति॥ तथा च तर्कितमेव
तद्विरोधित्वनिरूपकं न तु वास्तवमिति भावः। तमेव तर्कमाह॥ यदीति। स्तंभोयदि पिशाचः स्यात् पि
शाचत्वेन प्रमाविषयः स्याद्योयदा स्तंभस्तदा स्तंभतया प्रमाविषय इति सामान्यव्याप्तेरत्र दृष्टां
तः स्तंभ एवेति। विशेषव्याप्तौ तु व्यतिरेकदृष्टांतोयं॥ अन्वये तु पिशाच एव दृष्टांत इति ध्येयं॥ ए
तेनोपलंभः पदं यदि प्रत्यक्षपरं तदा व्याप्त्यसिद्धिः यदि ज्ञानमात्रपरं तदेष्टापादनमित्यपास्तं॥
स्तंभोयदि पिशाचवतादात्म्यं स्यात् स्तंभतादात्म्यमिव तदा प्रतीयेत। स्तंभेयत्तादात्म्यं तदुपलभ्यत इ
ति व्याप्तेरर्थ इत्यन्ये। नन्वाकाशादितादात्म्यस्य शब्दाश्रयत्वादिरूपतया ज्ञातित्वाभावात् घटादि
वृत्तित्वेन तदुपलंभोपपादयितुं न शक्यत इति। तदन्योन्याभावस्तत्र कथं प्रत्यक्ष इति चेत् आनंका
शादिघटघोरभेदे आकाशत्वादेरपि ज्ञातित्वापत्तेरावश्यकत्वात्तदापादनसंभवात्॥ नह्येकव्य

तु॰ अ

॥१०४॥

किंत्वमहाय्यान्यदाकाशत्वादीनां जातिबाधकमस्तीति भावः॥ यद्यपि सामान्यविशेषसमवायान्यो
न्याभाववेद्यमपि कश्चिन्न संभवति तथापि घटादिव्यक्तिवृत्तितादात्म्येन तत्र तद्रूपलंभापादनं श
क्यमिति ध्येयं॥ पक्षतावच्छेदकनान्यत्वइति। अत्र वदंति। यदि पक्षतावच्छेदकनानात्वे एकत्वे वा
सर्वपक्षव्यक्तिष्वेकैव समूहालंबनरूपा साध्यसिद्धिरुद्देश्या भवति। तदोभयत्रापि क्वचि
त्पक्षे साध्यसिद्धौ ज्ञातायां नांशतः सिद्धसाधनं तदंशोद्देश्यभूतायाः समूहालंबनसाध्यप्र
तीतेरज्ञातत्वात्। यदा तु समूहालंबनतादृशुदासीनायां क्वचित्साध्यसिद्धिरुद्देश्या भवति तदो
भयत्रापि तद्वर्जनीयमेव पक्षतावच्छेदकैक्येपि तदंशे साध्यसिद्धेर्ज्ञातत्वेन तदुद्देश्यतावि
च्छेदात्। तस्मादेतच्चिंत्यमिति॥ अत्र ब्रूमः॥ पक्षतावच्छेदकैक्ये अंशतः सिद्धसाधनं न भवत्येव।
पक्षतावच्छेदकधर्मसामानाधिकरण्येन क्वचित्पक्षे साध्यसिद्धौ सिद्धसाधनमेवेति नांस

॥१०४॥

ताः सिद्धसाधनं। तादृशासिद्धेरेवानुमानसाध्यत्वात् तदसिद्धौ हि तथ्यं कैव नास्ति न हि पक्षे साध्य
सिद्धिमात्रेण तत्। धूमवत्त्वेन पर्वते वह्निमत्त्वनिश्चये सिद्धसाधनप्रसंगात् तस्मात्स्वकृते घटत्वेन सा
ध्यसिद्धावपि पक्षतावच्छेदकसामानाधिकरण्येन तदसिद्धेर्नोक्तदोषः। नन्वेवं पृथिवीत्वस्य प
क्षतावच्छेदकत्वात्।। तत्सामानाधिकरण्येनैव घटे साध्यसिद्धेः सिद्धसाधनमेवास्तीति चेत्। न।।
सर्वपृथिवित्वस्य पक्षतावच्छेदकत्वात् तदिदमुक्तं। सर्वपृथिवीतरभिन्नेति भेदस्य प्रतीतेरसिद्ध
त्वादिति। अत एवाग्रे सर्वत्वेन न पक्षतेति वक्ष्यते यत्तु समस्तहाळंबनानुमिसुदे[illegible]स्य तायां पक्षताव
च्छेदकेनानात्वेपि नांशतः सिद्धसाधनमिति तन्नैव सिसाधयिषाविरहस्थळ एव तत्रांशतः सि
द्धसाधनस्योक्तत्वादिति।। अन्यथेति।। यद्यनुमितिविषयैकदेशासिद्धौ सिद्धसाधनमित्यर्थः। ननु

९८

धूमवानित्यादिना सामान्यतो निश्चिते विशेषरूपेण संशयस्योपपादितत्वेपि विशेषरूपेण नि-
श्चितेपि सामान्यतः संशयो नोपपादितः। तथा सति दे पर्वतत्वेन वह्निनिश्चये पर्वतत्वेन तत्संशयः
स्यात्। किंच यदवच्छेदेन यत्र यत्कोटिनिश्चयस्तदवच्छिन्ने तद्धानं तत्र तत्कोटिकसंशयविरोधि
न तु तत्प्रकारकतत्कोटिकसंशयविरोधि गौरवात्। अत एव धूमत्वेन व्याप्तिनिश्चये सति धूम-
त्वेनोपस्थितायां व्यक्तौ विशेषतोपि न व्याप्तिसंदेहः। तदुक्तं॥ यत्र हि यद्व्यावर्तकधर्मद-
र्शनं तत्र न तत्संशयः। तच्च सामान्यविशेषवै[illegible]यरितोषादाहे॥ यद्वेति। पृथिवीत्वेनेति। घटादि-
भिन्नपृथिवीत्वेनेत्यर्थः। अन्यथा पूर्वोक्तरीत्या सिद्धसाधनप्रसंगात्। अत एवेश्वरानुमाने विप्र-
तिपत्तिविषयमात्रसंग्राहकपक्षतावच्छेदकनिर्वचनेन निर्बंधः। अन्यथा कार्यत्वेन तावन्नामेव
पक्षत्वे अदोषात्। न चांशतः सिद्धसाधनभिया तादृशपक्षतावच्छेदकनिर्वचनं। तत्र तथा च प-

स्य

॥१०५॥

॥१०५॥

ध्यतावच्छेदकैक्ये तदभ्युपगतमेवेति वाच्यं। एतन्मते सिद्धसाधनस्यैव तन्निर्वचनात्। अन्यथा
कार्यं सकर्तृकमित्यत्रापि घटादावंशतः सिद्धसाधनेऽपरेणोद्भाविते कार्यत्वेन क्षित्यादिकमेव पक्ष इ
त्युद्भावनादेव विजयेत वादीति भावः। पूर्वमतेऽप्यन्वयित्वमापादयति। घटसाध्यारूपेति। अन्वयेति।
उक्तरीत्या हेतुसाध्यसामानाधिकरण्यग्रहादन्वये भावेऽपि व्याप्तिवारानुपस्थितिदशायामन्व
यव्याप्तिप्रतिसंधानसंभवादिति भावः। उक्तप्रकारस्याकाशादावसंभवादिति तदर्थं प्रकारांत
रमाह। अथ चेति। एतच्च व्यासज्यवृत्तिप्रतियोगिकाभावपक्षे। अन्यथा उक्तदोषे तेजोऽर्के। दि प्या ४
भेदसत्वेऽत्रयोः द्वयोरेकदा साध्यासंभवेन विपक्षत्वानुपपत्तेः व्यतिरेकव्याप्तिग्रहानुपपत्तेः प्रत्येकं
साध्यतायामुभयसाधारण्यापत्तेः। तस्माद्व्यासज्यवृत्तिधर्मस्य साध्यतावच्छेदकत्वेन तदवच्छिन्ना
भाव एकसत्वेऽप्यस्तीति नोक्तदोषः। अत एव व्यासज्यासाधारण्यमपि निश्चितसाध्यतावच्छेदकावच्छि

95

कुअ

न्नवद्यावृत्त्यादितद्वतिप्रकृते हि न तथा प्रत्येकाभावस्य व्यासज्यवृत्तिधर्मावच्छिन्नत्वाभावात् । अन्य
ना या एक[illegible]पि द्वित्वे ति बुध्यापत्तिः अत एवाग्रे वक्ष्यति तावद्भाववयोगी अत्र सपक्षो भवति न तु तद्देके
देशः कतिपयाभाववान् साध्यतापर्याप्तावतिपर्याप्तेरिति । न चैवं साध्यतावच्छेदकेन रूपेण साध्यप्रसि
द्धिरपेक्ष्यमिति वाच्यं । भिन्नभिन्नाधिकरणस्थानामप्यभावानां [illegible]त्रयो देशत्वादिना ज्ञानसंभ
वात् । भिन्नाधिकरणस्थघटयोर्द्वौ घटाविति धीवत् । यत्तु प्रत्येकव्याप्तिभिः प्रत्येकाभावाना
मपि साध्यत्वे नासाधारण्यं अनुमितिविषयसाध्यवद्वृत्त्यादितद्वतिसत्त्वे ति पक्षो व्यापक
॥१०६॥ विपक्षे तथैव तस्य दोषत्वनिर्वाहात् ॥ अनुमितिविषयमिळितान्योन्याभावासमंच साध्यमन्यत्र
न प्रसिद्धं येनासाधारण्यं स्यादिति तच्चिन्त्यं ॥ तथापि प्रत्येकाभाववद्वृत्तित्वज्ञानेन प्रत्येकाभाव ॥१०६॥
साधनस्य निःकळंकत्वेन मिळिताभावासिद्धेः । मेळ[illegible]कस्यातिरिक्तस्यासिद्धेः । सिद्धौ वा मेळकिना

नसिद्धौ सर्वथा तदसिद्धेरिति। केचित्तु साधारणो दृश्यादिविशेषे दोष इति यदा तद्दावतारो नास्ति तदा कश्चि
द्यमपि केवलः संभवतीत्येतदुक्तमित्याहुः। सर्वसाधारणप्रकारांतरमाह॥ यद्वाजळमिति॥ यद्यप्यु
क्तानुमानाङ्गळभेदस्यासिद्धेः सिसाधयिषितत्वयोर्दृश्यभेदस्यों प्रसिद्धिरेव तथापि तेजःप्रभृतिद्वादे
शान्यभिन्नानिष्ठभेदप्रतियोगित्वं साध्यं अतो नोक्तदोषः अन्ये तु तेजःप्रभृतिद्वादशभिन्नं तत्तज
ळभेदवत् जळनिष्ठभेदप्रतियोगित्वादित्यनुमानाचरान्तं तत्सिद्धिरित्यपि प्रेत्यैतदुक्तमित्याहुः।
यत्तु जळे द्वादशान्यभिन्नेपि जळभे दस्यभानसमानसं
विसंवेद्यत्वादिति तत्तुच्छं॥ विशेषणविशेष्याद्विभेदेन समानसंविसंवेद्यतासिद्धेः। तत्प्रतियो
गिकभेदभानसमाने तन्निष्ठभेदप्रतियोगित्वंभासत इत्युचितं। अतएव गवयेगोसादृश्यभा
समाने समानसंविसंवेद्यतया गवि गवयनिष्ठसादृश्यप्रतियोगित्वज्ञानं॥ ननु गवयप्र

॥१०७॥

तियोगिकत्वनिरूपसापेक्षज्ञानमपि। अन्यथा शाब्दोपमानस्य प्रत्यक्ष एवान्तर्भावात्। अनु
मानांतर्भावप्रयासानुपपत्तेरिति॥ इतर[illegible]भावान्योन्याभावस्य साध्यत्वादिति। इतरप्रतियो
कतावदन्योन्याभावत्वेनैव[illegible]रूपेण यदि साध्यता न तदा अभाववहिर्भावादनुमानांतरापे
क्षायद्वि अभावप्रतियोगिकस्वरूपभेदवत्वे सति [illegible] ज्ञानादिभावप्रतियोगिकत्रयोदशा
न्योन्याभावत्वेन साध्यताप्रवृत्ति वीतरत्वा वह्निन्नप्रतियोगिकान्योन्याभावस्यैकस्य वा साध्यता
तदा नानुमानांतरापेक्षा। ननु द्वितीयपक्षे अभावप्रतियोगिकाभावांतरानभ्युपगमेन ज्ञानादिप्र
तियोगिकस्याप्रसिद्धेन्नाभावप्रतियोगिक इति चेत्॥ न॥ भावाभावसाधारणप्रतियोगितावच्छेदक
सिद्धेनाभावस्यापि प्रतिरिक्ताभावस्वीकारस्यावश्यकत्वात्। अन्यथा कार्यत्वेसा[illegible]त घटभिन्नावारि
णोपि प्रमेयत्वादेस्तद्व्याप्यत्वापत्तेः॥ कार्यत्वस्य ध्वंसवृत्तितया प्रमेयत्वादिसमानाधिकरणत्वं ता

द्वौ २

॥१०७॥

भावप्रतियोगितानवच्छेदकत्वात्। तस्मादकामेनापि भाभावसाधारणकार्यतावच्छिन्नप्रतियो
गिकाभावोऽभ्युपेयस्तच्चेहापि॥ ननु पृथिवीतरत्वस्य पृथि व्यन्योन्याभावत्वस्याभावेऽभ
भावेन तत्साधारणधर्मान्तराभावेन भावाभावसाधारणस्यान्योन्याभावप्रतियोगितावच्छेद
कत्वमेवात्र दुर्निरूप्यमिति चेत्। न जलादिभावाभावविशेष्यकसमूहालंबनसंभवेन ज्ञाने
विशेषविशेष्यत्वस्य तादृशस्य सत्वात्। न चाभावबहिर्भावपक्षे अभावस्यैवासपक्षत्वात्तेतो
ऽव्याप्तत्वेऽन्वयित्वमव्याप्तत्वे वासाधारण्यमिति वाच्यं॥ तस्य सपक्षत्वाप्रतिसंधानदशा
यामेवास्याभिमतत्वात्। अभावस्याभावान्तरानाश्रयत्वादेव न सपक्षत्वमित्यप्याहुः॥ तेन स
ममिति। यद्यप्यभावस्वरूपभेदस्य पृथिवीजलादिस्वरूपत्वेनाननुगमत्वादेव स्वच्छ एव तथाप्य

९९

त्वं सामान्याभावः स्वपदार्थयोग्यत्वं तत्र पक्षके पृथिव्यादौ प्रसिद्धः संभवन्नपि नाकाशादिपक्षके त
त्रासंभवस्यात्र तत्र पृथिव्यादावपि अप्रसिद्धेः एवायं नहि केचिदपि पृथिवीत्वव्यधिकरणधर्मस्य संसर्गायोप
दर्शितुत्वस्य तधर्माद्विवेदयोग्यस्य सतोऽप्यनुपलम्भसंभवेनात् तथा च योग्यानुपलम्भासंभवात् पृथिवीसामा
न्याभावप्रसिन्नत्वबुद्धि... नन्वयोग्यत्वमनुगतमस्तीति भावः॥ न चात्यावयर्निघटादौ व्यभिचारः। पृ
थिव्यादिरूपस्याभावप्रभेदस्य तत्राभावादिति वाच्यं घटादिव...न इत्यबाधितप्रतीत्याप्रमे
यत्वेन स्वस्यापि तस्मिन्ननन्यगत्यात्वाभ्युपगमात्। स्व... ॥ प्रतीतिवै
चित्र्यस्या...न्यथानुपपत्तेरितिदिक्॥ ॥ पृथिवीत्वभिन्नेति। पृथिवीत्वासमानाधिकरण
धर्मवत्त्वावच्छिन्नात्यन्ताभाव इत्यर्थः॥ आकाशपक्षकेऽस्याप्रसिद्धिरित्यस्वरसादाह। ऽता
वादीति। तत्त्वादीति। योग इति पक्षधर्मताबललब्धसाध्यसंबंधाभिधानं। अत्यन्ताभावस्यैव सा
ध्यत्वात् अन्यथाग्रिमग्रंथविरोधात्। अत्र लादिवत् तन्नियतस्नेहाद्यभावोऽपि साध्य इति न पू
र्वापरभेदः। योगो मेलक इत्यन्ये। ननु प्रत्येकं साध्यतायां समस्ताहालंबनानुमित्या तदभावसिद्धौ

त्यासंभावि
... भआप
न्याभाववैद
योग्यएवैश
यमितिवे
यं।५
पि२

पु० अ

१०८॥

॥१०८॥

वसाधारण्यमितिमिलितसाध्यतायामप्रसिद्धिरित्यनुशयेन व्यासज्यप्रतियोगिकाभाववादि
मतमेवावलंबते मिलितानामपीति। किंचिदिति। त्रयोदशत्वसमानशीलस्य तादृशापेक्षाबुद्धिवि
षयस्य सत्वादिति भावः। एते न तादृशबुद्धिविषयत्वावच्छिन्नानामेवाभावानां तेजः प्रभृतिषु सत्वे
न तेषां विपक्षत्वार्थमैकारण्यावच्छेदक एवमैं [illegible] कपदार्थो वाच्यः सत्वाप्रसिद्ध एवेति निरस्तं।।
व्यासज्यवृत्तिधर्मस्य साध्यतावच्छेदकत्वाभ्युपगमे न तदवच्छिन्नाभावस्य तदेकदेशकतिपया
भावकसत्वेपि तेजः प्रभृतिषु सत्वेन तेषां विपक्षत्वसंभवात्। न चाभावेषु व्यासज्यवृत्तिधर्मश्च ना
स्तीति वाच्यं। अभावे संख्या नास्तीति विशेषदर्शनवतः त्रयोदशत्वव्यवहारानापत्तेः। न चाव्यास
ज्यवृत्तिता दशाबुद्धिविषयत्वेनैव सा इति वाच्यं। अव्यासज्यवृत्तिधर्मस्य प्रत्येकाधिकरणावि

ॐ

॥१०१॥

आंतत्वं नैकस्मिन्नप्यभावे त्रयोदशत्वादिव्यवहारापत्तेः। एकत्रापि घटे द्वघट इति प्रतीतिवत्। अत
एव जलादौ तत्र त्रयोदशाभाव इति सर्वेषां प्रतीतिः। तस्माद् एकाभेनापि तत्र व्यासज्यवृत्तिधर्मो ऽप्यु
पेय इति॥ तावतीति॥ व्यासज्यवृत्तिसाध्यतावच्छेदकस्य तावत्त्वेव पर्याप्तेरिति भावः। एकाधिकरण्या
वच्छेदकस्यापि मेळकपदार्थत्वे न साध्याप्रसिद्धिरित्याह॥ यद्वेति॥ अत्यंताभावत्वादिति॥ इतरनि
रूपणाधीननिरूपणकाविशेषितप्रतियोगिकात्यंताभावत्वादित्यर्थः। तेन तेजोभिन्नप्रमेय
त्वात्यंताभावादौ न व्यभिचारः॥ यत्तु अभावाविशेषितप्रतियोगिकात्यंताभावत्वादित्यर्थ इति तत्स
न्न। तेजोन्यप्रमेयमिति ज्ञाने विशेष्यत्वात्यंताभावे तथापि व्यभिचारात्। तेजोमात्रवृत्त्यत्यंताभाव
त्वादित्यन्ये॥ किंचेति॥ अत्र निरधिकरणानामेव जलादिभेदानां प्रसिद्धौ सपक्षानिश्चयात्सये

॥१०१॥

कव्याप्तिभिरपि प्रत्येकभेदसाधने नासाधारण्यमिति हृदयं ॥ ननु गुरुत्वेन जलमात्रभेदस्तो
जःप्रभृत्यभेदाश्च लिंगांतरैः साधनीयाः किं वेतरभेदनिषेधेनेतराभेदः । अन्यतमभेदाभा
वेनापि समुदायाभावादेकसत्त्वेपि द्वयमिह नास्तीति प्रतीतेः । अन्यथा चतुर्दशभेदरूपसाध्य
स्याभावाप्रसिद्ध्या व्यतिरेकव्याप्त्यग्रहप्रसंगादित्यत आह ॥ चतुर्दशेति ॥ प्रत्यक्षादिना प्रत्येक
भेदस्य पक्षे निश्चयेनान्यतराभावेनापि चतुर्दशाभेदस्य बाधान्न सत्प्रतिपक्ष इति भावः । अ
भावपदार्थमादय चतुर्दशात्वं बोध्यं ॥ विरोधेनेति ॥ प्रमाणसिद्धप्रत्येकचतुर्दशभेदविरोधेने
त्यर्थः ॥ लिंगत्वे वेति ॥ तत्रापि तेत्साध्याधिकरणजलाद्यन्यतरत्वस्य लिंगत्वसंभावादिति भावः ॥
यद्यपि जले पृथिवीतरभेदस्य बाधेन न सिद्धिप्रसंगः जले तरभेदस्य सिद्धाविष्टापत्तिः । तथापि

10

कुंअ

पूर्वं दोष एव

…त्म मन्यात्मत्वे तत्र न व्यभिचारादित्यर्थः … न किं गतस्यैव स… ध्यत्वादित्य… तात्पर्यं॥ व्यभिचारादिस्तु पक्षे सपां॥ असाधार
ण्यादित्यपि द्रष्टव्यं॥ इच्छादीति॥ इच्छाद्यवच्छेदकत्वादित्यर्थः। तस्येति। योग्यानुपलब्धेरभावादिति
भावः॥ कार्यत्वादिति भावे कार्यत्वादित्यर्थः॥ ज्ञानेति॥ घटादेरपि सपक्षत्वापत्तौ ततो हेतुव्यावृत्तौ
वसाधारण्यमित्यत आह॥ ज्ञानसमानाधिकरणेति॥ आत्मघटसंयोगस्य घटादौ सत्त्वाद्दोषतादव
स्थ्यमित्यत आह ज्ञानेकारणीभूतेति तादृशस्तत्त्वादे घटादौ सत्त्वादुक्तदोषतादवस्थ्यमित्यत आ
ह संयोगेति। आत्ममनसोः सपक्षत्वनिरासायाह कार्येति। न च प्राणेति संगः। आत्मप्राणसंयोगस्या
न्यथासिद्धतया ज्ञानाहेतुत्वादिति वक्ष्यमाणत्वादिति भावः। शरीरावयवस्य पक्षत्वा… निश्च
यदशायामेवास्यावतार इति नान्वयं माशंकनीयं शरीर एवेति। यद्यप्युक्तं सात्मकत्वं शरीरस्यैव प्य
यित्व
वय

॥११०॥

॥११०॥

स्ति तथापि तत्र तत्त्वसिद्धाकत्वयित्वमप्रसिद्धत्वसाधारण्यं। इति भावः। दोषांतरमाह। असाधारणेति
इत्थं। असमवायिकारणत्वासिद्धौ संयोगासमवायिकारणकत्वस्य कापि नास्तीत्यत आह इत्थं चेति।
भावे कार्यत्वादिति शेषः। इत्थं व्यक्तिपक्षे केशब्दजशब्दे व्यभिचारः स्यादिति जातिपक्षकमुक्तं स्वे
हत्वे व्यभिचारादाह नित्येति। तच्च नित्यमात्रेंद्रियग्राह्यत्वमतो [illegible] मनोग्राह्यत्वेन न दोष तावत्स्वाद्यंत २५
स्येति भावः। एतच्च गुणविशेषणं न जातिविशेषणं। अन्यथा आत्मैकत्वे नित्यमात्रेंद्रियग्राह्यजात्य
भावेन व्यभिचाराभावात्तद्वारणाय विशेषणप[illegible]दोपादानानुपपत्तेः। आत्मैकत्वप्रत्यक्षत्वपक्षे सं
ख्यात्वजातौ व्यभिचारादाह। विषेति। शब्दजशब्दमात्रवृत्तिजातौ व्यभिचारादाह। साक्षादिति। साक्षा
द्व्याप्यत्वजातेरेवेति जातिपदं स्वरूपनिर्वचनपरं यदि च तद्व्याप्यजात्यव्याप्यत्वमात्रं तदा शब्दसंख्या

शे२

न्यतरवादौ व्यभिचारवारणायेति ध्येयं। इंद्रियत्वेन नित्येंद्रियग्राह्यत्वं विवक्षितं न तु तन्मात्रग्राह्यत्वं ए
वं च जातिविशेषणत्वेपि न दोष इति वयं। सत्त्वेति। किंचिदवच्छिन्नः संयोगोऽसमवायिकारणमित्यु
द्देश्यविधेयभावव्यत्यासेन योज्यं। अत एव तदनुकूलं तर्कमाह। संयोगमात्रस्येति। न चैवं संयो
गत्वं संभवदिति वाच्यं। असमवायिसंयोगत्वादिति हेत्वर्थस्य विवक्षितत्वादित्याहुः॥ यद्वेति॥ अत्रेत्थं यत्रा
प्यवच्छिन्नत्वज्ञानेन समानसंवित्संवेद्यतया अवच्छेदकत्वस्यापि विषयीकरणादिति साध्यप्रसिद्धि
र्दृष्टव्याप्तिः साधनभयेनाह। सामान्यत इति। अत एवेति सामान्यतः साध्यसिद्धौ सिद्धसाधनाद्यन
वकाशादेवेत्यर्थः। व्यतिरेकव्याप्तिं दर्शयति स्वशरीरइति। ननु शरीरं शात्मकं तत्त्वे बाधकाभावादिति श
रीरविशेष्यकबुद्धिरपि तदनंतरं सुकरैवेत्यनुशये नाहोपायस्येति। अवच्छेदकतासामर्थ्ययोरन्यतरा

॥१११॥

स्फुरणदशायामन्यतरस्फुरणस्यापर्यनुयोगादित्यर्थः। संस्काराजन्येति गुरुत्वाद्यजन्येत्यपि विशे
षणं। तेन पतनादौ न व्यभिचारः। प्रयत्नेति॥ याक्रियेति व्याप्तेरितिभावः। एवं चेति। सत्यंतमात्रस्य
आत्मन्यपि सत्त्वान्नतोहेतुव्याप्तत्वासाधारण्यमित्यत उक्तं शरीरत्वमिति चेष्टावत्त्वादिति। चेष्टा
वच्छरीरत्वादित्यर्थः। तेन शरीरावयवे न व्यभिचारः। आत्मनित्तन्नत्वइति एतच्च आत्मनोपि साध्य
वत्वे असाधारण्यवारणाय। आत्मविशेषगुणकारणेति मनः शरीरे कदाचिद्भोगाधिकरणत्व
मस्तीति साध्यवत्त्वेन तत्र व्याप्तत्वासाधारण्यमपि तत्रास्तीति न च कदाचिदुक्तभोगाधारत्वं चेष्टा
वत्वमप्यस्तीति वाच्यम् तच्छरीरव्यापृत्यै च वर्त्तमानचेष्टावत्त्वस्यैव साध्यत्वे सकलच्छिंगत्वात्तत्तश
रीरात्मसंयोगजनकतदवयवात्मसंयोगमादायतच्छरीरावयवेपि साध्यसत्त्वेनासाधार

हेतुरः

ननु तथापि पापजनकस्तत्र शरीरसंयोगमादाय दोषतादवस्थ्यमित्यत आह न्ये जेति।

पंरंस्यादतत्रूक्तं विशेषेतिप्रेरितृदंड संयोगवद्द्वष्टजनकापरशरीरादिसंयोगमादायमतत्रशरीरसाध्यसत्वेनोक्तदोषतादवस्थ्यमतत्रूक्तमात्मेति यद्यपि तस्यापि स्वगोचरसाक्षात्कारजनकत्वेदोषतादवस्थ्यं तथापि ज्ञानातिरिक्तात्मविशेषगुणकारणत्वं जन्यात्मविशेषगुणावच्छिन्नकारणत्वं वा विवक्षितमिति नोक्तदोषः मनसः स्वपरत्वेनिरासोयभोगानधिकरणात्वादितीति। नेत्रेहृयस्याप्येतदेवफलमित्याहुः॥ तच्चिंत्यं अत्र हेत्वंतरं तस्य सत्वे चेष्टावत्वहेतुमादाय व्याख्यानस्यासंगतत्वात्। तस्मात् सप्रकृत हेतुपरतयैवव्याख्येयमिति बोध्यं। नन्वात्ममनसोरपि हेतुसत्वे व्यभिचार इत्यत आहात्मेति। अतिप्रसंगस्तिया शरीरावच्छिन्नात्ममनोभ्यां प्राणस्य संयोगो हेतुनाचाद्यस्यावश्यकत्वात् शरीरस्पर्शिसंयोगेनैवान्यथासिद्धिरित्यर्थः। नन्वनात्मतया शरीरस्यापि भो

॥११२॥

गानधिकरण त्वेन तद्व्याप्तिस्या

गवत्वं तत्र बाधितमित्यनात्मनोपि भोगाधिकरणत्वं साधयति भोगाधारत्वमिति। सकलेति न च भोगाधिकरणप
दस्य स्वरूपासिद्धिवारकत्वेन वैयर्थ्यमिति वाच्यं। व्याप्यतावच्छेदकविकासकविशेषणे तथात्वाभावादित्या
हुः। तच्चिंत्यं। व्याप्याश्रयस्य विकासेपि व्याप्याश्रयविकासाभावात्। न वाश्रयविकासस्यापि न व्यर्थत्वं तत्र
यन्निष्ठेत्यादिनियमस्याप्यसंभवेन मानाभावात्। अन्यथा धूमालोकान्यतरत्वादावपि आलोकादिप
दस्यायोगोलकादिव्याप्याश्रयविकासकतया वैयर्थ्यं न स्यात्। तस्माद् अखंडाभाववद् अखंडोपाधौ
न वैयर्थ्यं वं त्वमित्यन्यत्र विस्तरः। यत्तु सकल जीवात्मवर्त्तिन्यात्मत्वे सकलवृत्तित्वं व्यभिचारीति। तन्न। शुद्ध
सकलपदस्य यावदर्थ एव वृत्तेरिति। ननु भोगानधिकरणवृत्तित्वमत्रोपाधिः अन्यथा रूपाधारत्वादी
नामपि रूपादिसमवायित्वेन वृत्तित्वानुमानापत्तिरित्यात आह। के॰॥ तार्किकरीतिरिति॥ तथा च शरीर
सुखमित्यादि तदाधारतानुभवो न स्यादित्यनिष्टप्रसंगात्मकतर्केण हेतोः साध्यव्याप्यत्वेनिर्णीतेउ

ति२

सं २

पाद्ये: साध्याव्यापकत्वेऽप्यतएव न रूपाधारत्वप्रतिबंदिरपि तत्रैतादृशतर्काभावादिति भावः। केचित्तु सं
सार्यात्मत्वे संदिग्धानैकांतः साध्याभाववद्वृत्तया तत्र निर्णये ज्ञाते हेतुहेत्वादिति अत आह। तार्किकीरीति
रिति। तथा चोक्ततर्कवशादत्र व्याप्तिग्रह इत्याहुः॥ आप्तिनत्वेति॥ आश्रयत्वेत्यर्थः। साध्यनिश्चये विने
ति। तत्र व्याप्येतरतन्निश्चायकसाकल्यसत्वं गर्भस्य केचिन्निश्चयसद्भावएव सत्यासंभवासंभवा
अन्यथानिश्चायकाप्रसिद्धौ तदसंभवादिति भाव इत्याहुः। वस्तुतस्तु साध्यतावच्छेदकप्रकारे
ण साध्यप्रसिद्धिरनुमानांगं सा च न संशयरूपा तादृशकोटिप्रसिद्धेः। सिद्धौ वा निश्चयरूपैवसेतित
११३। त्वं प्रसिद्धिरिति। एतच्चेच्छाऽव्यवहिताश्रयाश्रितेतिपदि सामान्यतो दृष्टोव तारस्तादाऽभ्य व्या। यदि चेच्छाऽव्या ॥११३॥
श्रितेति। सामान्यतो दृष्टं तदाऽव्यवहितस्य प्रकारतया तदाश्रितत्वस्य वैशिष्ट्यमर्यादयाभानेनाश्रितत्व
रूपसाध्यतावच्छेदकावच्छिन्नस्य ऽव्यवहितेऽपि [illegible] प्रसिद्धतया तत्र प्रसि द्ध्युपवर्णनविरोधात्। एवं चान्व

पित्वापादनमग्रे विरुध्येत। तस्माद्यदि द्व्याप्तित्वे एवं सामान्यतो दृष्टं तदेवाप्यामेव साध्यप्रसिद्धिर्दृष्ट
व्या अत एव द्वा विशेष्यकप्रतीत्यर्थं व्यतिरेक्यवतार इति ग्रंथकृतोक्तं अन्यथा निश्चयार्थमेव तदव
तार इत्येव ब्रूयादिति। मानांतरादिति। वस्तुमातो नांतरा द्रुपस्थितानामपि न भानं। अनुमितेर्व्या
पकतावच्छेदकप्रकारकत्वनियमादिति भावः। ऽन्यथानु दिति। अपीत्यस्य स्वरसोद्भावनं तद्बीजं य
दी द्वाश्रयस्याष्टद्व्याप्तिन्नत्वेन ज्ञानं तदा साध्याप्रसिद्धौ व्यतिरेकिणो प्यनवकाश इति तत्समर्थनम
प्यत्राक्यं स्यादिति ध्येयं। व्यतिरेकिणि वास्तवसाध्याभावव्यापकाभावप्रतियोगित्वमेव गमकं ननु साध्य
भावत्वेन तस्योपस्थितिर पि तंत्रं गौरवादिति येमन्यते तन्मतउपन्यस्यति अन्ये त्विति। अत्रास्वरसबी
जमभावएवेत्यवधारणं। वह्न्यभावादेर्धूमाद्यभावव्याप्यत्वग्रहे वह्न्यादेर्भावस्यापि सिद्धावविरो

भावाभावस्वरूपसामान्यकतादेरपि सिद्ध्यविरोधाच्च। इत्यानेव विरोधो यदत्र साध्यप्रसिद्धिरभ्युपगमिति। यस्य
भावस्येति। यदात्मतयागृह्यमाणस्य व्यापकतयाहेत्वभावो गृहीतस्तदभाव एव व्यतिरेकिणा सिध्यती
त्यर्थः। तेन सुखस्य दुःखाभावात्मतयागृह्यमाणस्य व्यापकतया यत्र हेत्वभावो गृह्यते तत्र दुःखविशिष्टा
नुमितिः। ननु भावसिद्धिसमर्थितानवति। अन्यथा सुखविरहस्येव तत्र सिद्धिप्रसंगादित्याहुः। इतरस्येति
नेन्वितरपदार्थान्तर्गतात्मादिव्यापकत्वे पृथिवीत्वाभावस्यासंभविसंभवे वा तदन्यताभावसिद्धे
रुचितत्वेन तदन्योन्याभावसिध्युपवर्णने विरोधाद्धेत्वभावव्याप्यतयागृहीतस्यान्यताभाव एव व्यतिरेकि
णा सिद्ध्यतीत्यभ्युपगमादिति चेन्न। ॥ अत्राहुः ॥ अलौकिपदं जन्यत्वादितादात्म्यपरं। न चैवमप्यन्यताभा
व एव सिद्ध्येदिति वाच्यं। यथाहि हेत्वभावव्याप्यतयागृहीतस्यान्यताभावः सिध्यतीति नियमस्तथा तद
वच्छिन्नान्योन्याभावः सिद्ध्यतीत्यपि नियम एव। एवं च तस्यान्यताभाव इत्यपलक्षणं

२

॥११४॥

स्वरूपासिद्धिं परिहरति नचेति।६ अत्र विनिगमकमाह हेतुश्चेति।२

दते वह्निमान्योन्याभाववत्त्वा[illegible]त्यपि दुष्टत्वं। व्याप्याभाववत्त्वानावच्छेदकत्वाभावादित्युपलक्षणं व्याप्या
वह्निमान्योन्याभाववत्त्वानावच्छेदकत्वाभावादित्यपि दुष्टत्वं। केचित्तु अवच्छेदकतादात्म्यात्यन्ताभावस्य
वच्छेदकान्योन्याभावरूपतया तत्सिद्धान्तविरोधः। अवच्छेद्यान्योन्याभावात्यन्ताभावस्यावच्छेदकता
दिरूपतयावच्छेदकताघटात्यन्ताभावस्यापि अवच्छेद्यान्योन्याभावरूपत्वात् तयोः तादात्म्यात्यन्ताभावरूप
त्वस्य तस्य तत्तादात्म्यरूपात्यन्ताभावकत्वात्। अतः एवात्यन्ताभावप्रतियोगिनोः परस्परविर
रूपतानियमः। नचैवमवच्छेदकान्योन्याभाव[illegible]स्य नवच्छेदकतादिरूपत्वमिति वाच्यं। अप
सिद्धान्तात्। अतएवोक्तं ग्रंथकृतात्र अन्योन्याभावात्यन्ताभावस्य प्रतियोगिवृत्तिरसाधारणो ध
र्म इति। एकेनैवाभावेन तदन्योन्याभावतदत्यन्ताभावव्यवहारोपपत्तौ तदतिरिक्तकल्पने
मानाभावाच्च। नन्वेवमवच्छेदकत्वादिज्ञानं विना तदभावो न निरूप्येत प्रतियोगितावच्छेदका

अप्रयोजकत्वं परिहरति एकेनेति।२ अत्र दृष्टान्तमाह अतएवेति।५ अत्र सामान्यव्याप्तिमाह प्रसदा येति।६

106

ज्ञा२

वच्छिन्नप्रतियोगिज्ञानस्य हेतुत्वात्। तच्च तदितरावृत्तिगर्भं तदितरत्वमपि तदन्योन्याभावरूपं तयोर्दो
स्याभावरूपं तत्त्वं तादात्म्यत्वेन सापेक्षमिति आत्माश्रयानवस्थादिकमिति चेत्। न अभावस्य या
वत्प्रतियोगिनिरूप्यत्वनियमानभ्युपगमात्। अत एव घटप्रागभावतद्ध्वंसयोः परस्परप्रतियो
गित्वेपि न परस्परनिरूप्यत्वनियमः। केवलेनापि घटेन तन्निरूपणात्। न च तयोः परस्परप्रति
योगित्वमेव नेति वाच्यं। अन्यतरस्थितिकाले अन्यतरोन्मज्जनापत्तेः। तथा च तस्याभावस्योभ
यप्रतियोगिकत्वेपि उन्मज्जनादिनैव प्रतियोगिना तन्निरूपणमिति नानवस्थादिकमित्याहुः॥ अत्रेदं चिं ॥११५॥
त्यं। अन्योन्याभाववत्तादात्म्यात्यन्ताभावयोः प्रतीतिवैचित्र्याच्च तद्भेदानुपपत्तिः। प्रतियोगिभेदाद
भावभेदस्यावश्यकत्वाच्च अपि च अन्योन्याभावात्यन्ताभावयोर्विरुद्धधर्माध्यस्तत्वेनावश्यं भेदः।
ननु यथाभावव्यवहारहेतुर्घटः एवं घटाभावाभावव्यवहारेपि नैवेतावता विरुद्धधर्माध्यासः।

वस्तुतोऽभावस्यैव तस्याभावव्यवहारहेतुत्वात्तथा वस्तुतोऽन्योन्याभावात्मनोऽत्यंताभावात्मनो वा त
स्योभयव्यवहारहेतुत्वमस्तु न चैतावता विरुद्धधर्माध्यास इति चेत्। न। तदन्योन्याभावेन तत्तादात्म्या
त्यंताभावेन वा तदन्योन्याभावव्यवहार इत्यस्य नियंतुमशक्यत्वात्। घटादेश्च भावाभावव्यवहा
रहेतुत्वेऽपि भावत्वमेव प्रमाणबलादास्थीयते अत एव संयोगात्यंताभावतद्वदन्योन्याभावयो
र्व्याप्यव्याप्यवृत्तित्वं। पिशाचत्वात्यंताभावतद्वदन्योन्याभावयोरयोग्यत्वयोग्यत्वं चेति सिद्धां
त इति संक्षेपः॥ अन्ये तु अत्र मते संबंधिनोः सामानाधिकरण्यं न व्याप्तित्वेनाभिमतं किंतु तदुभ
यसंबंधयोः सामानाधिकरण्यं तदुभयसंबंधिव्याप्तिः। अस्ति च यत्र धूमसंबंधस्तत्रावह्निसंबं
ध इति सामानाधिकरण्यादग्निना धूमव्याप्तिः। परेणाप्यतिसंगवारणाय तत्तत्संबंधावच्छिन्न

107

कुअ

॥११६॥

तन्नसामानाधिकरण्यं वाच्यं तथा च जलाद्यवात्तत्संबंधसामानाधिकरण्यमेव तत्संबंधेन व्याप्तिरस्तु त
दिह यत्र जलादितादात्म्यं तत्र पृथिवीत्वाभावसंबंध इति जलादि पृथिवीत्वाभावरूपसंबंधिद्वयप्र
तियोगिकयोः तादात्म्यस्वरूपसंबंधयोरैकाधिकरण्यं व्याप्तिरिति जलादेरेव व्याप्यता। न च तादात्म्यं सं
बंध एव नेति वाच्यं। अविशिष्टधीव्यावृत्तविशिष्टधीनियामकत्वात्। अत एव तादात्म्यारोपो वि
शिष्टज्ञानं। तथा चेतरस्य जलादेरिति यथाश्रुतमेव साधुः। ननु भवतु तादात्म्यसंबंधेन भवतु व
तादात्म्यसामानाधिकरण्यं न व्याप्तिः तथापि जलादेरेव व्याप्यतया जलात्यंताभाव एव सिद्ध्येन्न
जलान्योन्याभाव इति चेत्। न। जलाद्यन्योन्याभावो हि तादात्म्यावच्छिन्नजलादिविरहः तथा च यत्सं
बंधावच्छिन्नसामानाधिकरण्यं व्याप्तिर्व्यापकाभावेन तत्संबंधावच्छिन्नविरहात्। यत्संबंधसामा
नाधिकरण्यं व्याप्तिस्तत्संबंधावच्छिन्नव्याप्याभावस्य व्यापकाभावात् सिद्धिरिति तादात्म्यसामाना

॥११६॥

[illegible]धिकरण्यग्रहात्तादात्म्याद्वह्निन्नविरहः सिध्यतीत्यभावसिद्धिसामान्यैवान्योन्याभावः सिध्य
तीत्याहुः। तदपि चिंत्यं। यत्रेयत्रै धूमसंबंधस्तत्रस्तत्र वह्निसंबंधइत्यादौ संबंधे धूमादिसंबंधीवि
शेषणमुपलक्षणं वा। नाद्यः। आकाशादेरव्याप्यतापत्तेः॥ नह्यत्राकाशादिविशिष्टः संबंधस्तत्रपर्य
वीताभावसंबंधइति व्याप्तिः संभवति आकाशादेरवृत्तितया तद्विशिष्टसंबंधस्य कुत्राप्यवृत्तेरिति॥ पू
र्वोक्तलाघवासंभवाच्च। नापि द्वितीयः॥ धूमाद्युपलक्षितसंबंधस्य धूमादावपि सत्वे न तत्र तत एव वह्निसं
बंधाभावेन व्याप्तिवारापत्तेः। वह्निसंबंधस्य संयोगात्मकस्य महानसादौ वृत्तेः। एवं दंडोपलक्षितसं
बंधस्य दंडेपि सत्वेन तत्र कुंडलसंबंधाभावात्समानाधिकरणयोरपि दंडकुंडलयोर्व्याप्तिर्न स्यात्। त
स्मादनन्यगत्यासंबंधावच्छिन्नसंबंधिसामानाधिमेव व्याप्तिः। तच्चेतरपदार्थातिगताकाशादावसंभ वतीति।

करण्य

(108)

जलत्वादीनामेव व्याप्यत्वमिति। व्यापकाभावेन व्याप्यावच्छिन्नान्योन्याभावसिद्धिमुक्त्वा ते न व्याप्यायं
ताभावसिद्धिं दर्शयति एवमिति। यस्य भावस्येति। यदा सत्तया गृह्यमाणस्येत्यर्थः। अयमिति॥ एते
न व्यतिरेकिण्यभाव एव साध्यत इत्यत्रानुशयाचरमपि स्थवितं परार्थानुमाने भावसाधारणस्य
प्रकारस्यैवानुसरणीयत्वादिति। अन्वयिनि व्यतिरेकिणि च निरूपिते अन्वयव्यतिरेकी निरू
पितप्राय इति तमुपेक्ष्य व्यतिरेकिसिद्धेरर्थापत्तेर्मानांतरत्वनिरासफलकत्वमप्याह व्यतिरेकीति।
ज्योतिःशास्त्रादिति। यद्यपि ज्योतिःशास्त्रं व्याप्तिमात्रग्राहकं ननु देवदत्तीयशतवर्षजीवित्वनि
श्चायकं तथापि ज्योतिःशास्त्रं यस्य स नक्षत्रे ति पुरुष एव विवक्षित इति केचित्। एतदस्वरसादेव तत्केचि
तल्लिंगाद्वेत्युक्तमित्यन्ये निश्चितो गृहेऽभावो गृहेऽभावस्य निश्चय इत्यर्थः। नियमद्वयेति। शतवर्ष

।जीव्येवेत्येकोनियमोग्रहएवेत्यपरः।तत्केपितल्लिंगेव्याप्तिरूपएकोनियमः।ग्रहएवेत्यपरइत्यन्ये
आम्नायमविद्वांसंकृतेतन्त्विति।आम्नायमुद्घाटयतिनेति।ननुग्रहाभावोनकरणंनियमग्राहकमानवि
रोधेनतस्यसंदिग्धत्वादित्यरुचेतआह॥ग्रहाभावस्येति॥देववत्तेति॥जीवनबाधेतासामपिबाधआवश्यकइ
तिभावः॥लक्षीतरमाह॥तथेति॥तथापीति।मरणापेक्षयाजीवनंबलिष्ठेतितत्केल्प्यनार्थमेवप्रथममर्थापत्तिः।
स्वीकारस्यात्।ततश्चतत्कल्पितजीवितलिंगकानुमित्याबहिःसत्त्वंसाध्यमित्यावश्यकतयागुर्वपि
बहिःसत्त्वमेवार्थापत्त्याकल्प्यतेनमरणमितितर्केश्चारीरमेवसर्वमिदंउष्टव्यो।तेनैतावचार्वाकसहकृतः
संयोगोबहिःसत्त्वंकल्प्यतीतिनोपसंहारविरोधः।नवागीविलस्यार्थापत्तिकल्प्यतेलोपवर्णनेऽत्र
पसिद्धान्तइति।प्रकृतेपीति।अत्रदेवदत्तोगृहेनास्तीतिनियमग्राहकप्रमाणंनियमग्राहकपदेन
विवक्षितंननुजीवीग्रहएवेतिनियमग्राहकंतथासतिबहिःसत्त्वप्रमाकुत्रापिनस्यात्ग्रहएवनिय

॥११८॥

मग्राहकस्य तत्राप्याभासत्वादिति भावः। यद्वेति। पूर्वदोषाभावो न हेतुः किं त्वतिशयोऽहितप्रमाशक्तिकस्य
ज्ञानसामान्यकारणस्य प्रमाहेतुत्वं न द्विरहाच्चोदाहृततस्थळे प्रमाविरह इत्यपि मतं अत्र च दोषाभा
वोपि प्रमाहेतुस्तद्विरहात् प्रमाविरह इत्युच्यत इति न पूर्वापेदः॥ प्रमाणत्वेति॥ अत्र ज्ञानत्वं वर्षजीवी देवदत्तः
गृहे एवेति नियमग्राहकस्य ज्ञानत्वं वर्षजीवित्वरूपविशेषणवाधाद्बाधाभिमतेति ध्येयं। तदनुसंधानं
विरुद्धार्थग्राहकत्वरूपलिंगप्रतिसंधानं। अबाधप्रसंगात्। अविळंबप्रसंगात् इत्यर्थः। दृश्यते च
तदनुसंधानं विना तत्र विळंब इति तदवश्यं त्वयापि स्वीकरणीयमिति भावः। वस्तुतस्तु तर्काव
तारकाळे पूर्वोत्पन्नः संशयोपि दुर्ळभः तावत्पर्यंतमनवस्थानात्। तथा च पुनः संशयासंजनम
पि एवं च तस्य कल्प्यप्रमाणत्वाभावतया क्लृप्तप्रमाणभावस्य सामान्यतोदृष्टस्यैव पुनरवतारो ळा
घवात् कल्प्यत इति भावः। लिंगनिश्चयार्थं सामान्यतोदृष्टांतरमाह। अपि चेति। न च प्राणित्वलिंग

॥११८॥

प्रतिसंधानेतदासिद्धमितिवाच्यं। अन्यतरव्याप्तिंविनाविनिगमकस्याभावादितर्कानवतारात्पूर्वोक्तयु
क्तेश्चेतिभावः। विरोधविषयत्वाज्जीवनविषयत्वात्तथाचविरोधिविषयतयामरणानुमानेनसत्प्र
तिपक्षः। जीवनग्राहकस्यज्योतिःशास्त्रकथितत्वसिध्यतिअन्यथाअन्यतरत्वग्राहकसामान्यतोदृष्टे
नविरोधाभावात्सत्प्रतिपक्षएवनस्यादितिभावः। जीवनग्राहकस्यज्योतिःशास्त्रकथितत्वेस्वादि
ल्लिंगस्यसर्वत्रेति। पर्वतोनपर्वतीयवह्निमान्धूमादित्यादिनाप्रतिबंधःस्यादित्यर्थः। जीवनग्रा
हकस्येति। अत्रेदंविचिंत्यं। विपक्षबाधकतर्कानवतारेसामान्यतोदृष्टस्यापिनजीवित्वनिश्चायक
त्वंसत्प्रतिपक्षितत्वात्। तदवतरेज्योतिःशास्त्रकथितलिंगादेवावश्यकात्जीवित्वनिश्चयेसंभ
वतिकिमनेनसामान्यतोदृष्टेनेति। तस्मादितिअतुल्यबलेननसत्प्रतिपक्षत्वमित्यर्थः॥ सचेति।

110

कुअ

प्रमाणत्वाप्तिमतयोर्द्वयोरपि बाधः स्यादिति चेत्परस्त्या प्रागुक्तं प्रमाणापेक्षया जीवनं लब्धमिति लाघवज्यो
तिःशास्त्रार्थयथार्थत्वं च विनिगमकं स्वपक्षे द्रष्टव्यं। अन्ये मीमांसका इत्यर्थः॥ अप्रमाणस्यापीति तथा च
यत्र जीवी गृह एवेति वस्तुतोऽप्रमाणमपि प्रमाणत्वेन ज्ञायते तत्रापि तद्विरोधिवहिःसत्त्वमेव कल्प्यते
न मरणमित्यर्थः॥ किंचेति॥ मृते मरणं गृहस्थिते गृहसत्त्वं बहिःस्थिते बहिःसत्त्वमिति यथायोग्यं ज्ञेयं
अत्रेष्टापत्तिमाशंक्याहार्थापत्त्येति। अन्ये तु किंचेत्यारभ्यार्थापत्त्याभासस्यैवं न स्यादित्येको ग्रंथः।
अप्रमाणत्वादित्यस्यानंतरमिति पूरणीयः तेन हेतुत्वं लभ्यत इत्याहुः। विशेषव्याप्तिमूलकमनुमा
नमुक्त्वा सामान्यव्याप्तिमूलकमनुमानमाह विद्यमानत्वे सतीति द्वितीयानुमानं दूषयति। सामान्यत
ति पक्षत्वतत्त्वयोरननुगमान्न व्याप्तिग्रह इति भावः। स्वोक्ते दूषणे खंडनसम्मतिमाह॥ तदुक्तं यतो
न्यत्वमिति॥ यतः कल्पनीयादन्यत्वं तस्यान्यत्वप्रतियोगिनोऽग्रे प्रथमतः सिद्धस्तस्याऽर्थापत्तौ

॥११९॥

रसिद्धेः प्रमाणत्वासिद्धेस्तत्फलत्वेनाभिमतस्यान्यत्वप्रतियोगिज्ञानस्य प्रमाणान्तरादेव ज्ञातत्वात् तद
ज्ञातत्वे वान्यथानुपपत्तेरेवाज्ञानादित्यर्थः। यद्वा यतः कल्प्यनीयादन्यत्वं तत्सिद्धेः पूर्वं तदसिद्धेरुक्तानु
पपत्तिज्ञानासिद्धेरित्यर्थः॥ देवदत्तस्याभाव इति अत्र देवदत्तस्येति प्रतियोगित्वं षष्ठ्यर्थः प्रकारो न तु
नेह देवदत्त इति वैसंसर्गमर्यादया प्रतियोगित्वभावं ते न प्रतियोगित्वत्वरूपव्याप्यतावच्छेदकावच्छि
न्नप्रतियोगित्वरूपपक्षलिंगत्वाभावादनुमानावतारः अन्यथा वैशिष्ट्यविषयाप्रतियोगित्वमात्रोपस्थिता
वपि व्याप्यतावच्छेदकावच्छिन्नलिंगानुपस्थितौ नानुमानं स्यात्। न चैवं यत्र संसर्गमर्यादयैवाभावे
तत्रानुमानानवतारेणार्थापत्तिः सावकाशेति वाच्यं अर्थापत्तावपि वह्निः सत्त्वं विना गृहनिष्ठाभावप्रति
योगित्वस्येवानुपपन्नत्वबुद्धिर्गमिकेति प्रतियोगित्वावच्छिन्नोपस्थितिं विना तेनाप्यर्थापत्त्यवतारान प्रभु
पगमादित्याहुः। अधिकस्य पक्षविशेष्यकत्वस्या ननु गृहनिष्ठाभावप्रतियोगित्वस्यापि देवदत्तस्य धर्मित

त्याअसंभिकृष्टत्वात्तद्विरोध्यकोपि चाक्षुषपरामर्शोपि उत्संभवीत्यनुशयेनाह॥ अथ चेति॥ पूर्वोक्तदोषनि
रस्यति॥ यथा चेति॥ ननु साधिकरणतानुमितावपि व्यापकतावच्छेदकप्रकारनैयत्येनाधिकरणत्वेनैव
पर्वतानस्यान्नानु पर्वतत्वेनेति न तया पर्वतत्वप्रकारकज्ञानं न कार्यापत्त्येन्यथासिद्धिः एवं च मयूरो
नृत्यतीति वाक्यअधिकरणबोधकपदाभावात्सामान्येनापि रूपेण न पर्वतभानं कुतः पर्वतत्वेनेति
न शाब्दे नापि तदन्यथासिद्धिरित्युभयत्रापरितुष्योन्नाह॥ यद्वा मयूरनृत्यमिति॥ श्रुतार्थापत्तिनादी
भौदृदृः प्रत्यवतिष्ठन्ते॥ अथेति॥ रात्रिभोजनोपपादकं रात्रिभोजनोपस्थापकमित्यर्थः। तेनेति। रात्रिभो

जनेनेत्यर्थः। योग्यतावच्छेदकरूपेणोपस्थितिं विना न शाब्दादन्वयधीरित्यत्र प्राभाकरसंमतिमाह॥

यथेति॥ उपस्थितस्य योग्यस्य योग्यताज्ञानाच्छाब्दधीर्न तु योग्यतावच्छेदकरूपेण तस्योपस्थिति
स्तत्रं गौरवादित्यपिप्रेत्यसिद्धांतमाह॥ बाधकेति॥ न्यायसाध्यमित्युपलक्षणं। तदवयवसाध्यमित्यपि
द्रष्टव्यं।

।तेन तदवयवाश्चेति व्यर्थमिति नाशंकितव्यमिति भावः।उदाहरणोपनयरूपमवयवद्वयमिति बौद्धाः।उदा
हरणांतमवयवत्रयमिति मीमांसका इति तन्निरासं हृदि निधायाह प्रतिज्ञेति पंचानामपि यथा प्रयोग
स्तथा तत्र तत्र वक्ष्यते॥ ॥समस्तेति॥ स्वरूपं पक्षत्वादि॥ किं विति॥ अनुमितिचरमकारणत्वमनुमिति
जनने स्वेतरभावविशिष्टानानपेक्षत्वं प्रयोजकत्वं जनकज्ञानजनकत्वं॥ शाब्दज्ञानपदं चरमकारण
परामर्शानूनविषयज्ञानपरं अत्र वह्निव्याप्यधूमवानयमित्याप्तवाक्येति व्याप्तिवारणाय प्रयोजकांतं
परामर्शजनकेति कृते असंभवः न हि तज्जनकविशिष्टवैशिष्ट्यावगाहिज्ञानजनकं वाक्यं संभवति तस्य
ज्ञानस्य मानसत्वादित्यत उक्तं॥ जनकजनकेति॥ संस्कारद्वारा परामर्शजनकशाब्दज्ञानजनके पूर्वोक्तवाक्ये
तिव्याप्तिवारणाय ज्ञानेति॥ तज्जन्यज्ञानस्यापि यत्किंचिज्जनकज्ञानजनकत्वसंभवादुक्तदोषतादवस्थ्य
मित्यत आह॥ अनुमितिचरमकारणेति॥ लिंगपरामर्शपदं स्वरूपकथनपरं॥ वह्निव्याप्यधूमवानयमिति

॥१२९॥

वाक्यावयववावयवेति व्याप्तिवारणाय शाब्दज्ञानपदं तदर्थस्तूक्त एव आस्तादावति व्याप्तेराह वाक्यपदं। अ
न्येतु शाब्दज्ञानं पदं कंटको द्वाररूपे न्यायप्रभिन्ने वाक्ये इति व्याप्तिवारणाय तच्च अनुमितिचरमकारणपराम
र्षजनकव्याप्तिज्ञानादिजनकयोग्यताज्ञानजनकतया ताद्दशपरामर्षजनकज्ञानजनकज्ञानजनकं
न्यायमाभास इत्यनेन व्याप्त्यादिविशिष्टधीजनकयोग्यताज्ञानजनजनकत्वात् न च शाब्दपदद्दानेप्येष दोषः
शाब्दज्ञानत्वेन ताद्दशपरामर्श प्रयोजकत्वस्य विवक्षितत्वात् न च योग्यताज्ञानं तथा जनकं योग्यताज्ञानत्वे
न जनकत्वात् न्यायजन्यज्ञाने तु शाब्दज्ञानत्वेनैव जनकत्वं वा क्त प्रयोगजज्ञानएवोक्तपरामर्शसाध्यौ स
त्वेत्वात्। अन्यत्र त्वोक्त वाक्यद्वह्नि व्याप्यवानयमिति परामर्षस्यैवाह योत्यचेरित्याकारएवानुपदं स्फुट
त्वात्। एवं सत्याप्तोक्त वह्नि व्याप्यवानयमिति वाक्यावयवावयवेति व्याप्तिवारणाय वाक्यापदं महावाक्य
परमित्याहुः। न च पर्वतोग्निर्धूमो यतः। धूमश्च वह्निमन्मात्रवृत्तिः। अस्ति च ताद्दशो धूमे पर्वतवृत्तित्वात् तस्मा
दग्निः पर्वत इति इत्यादौ न्यायेसमानाव्यैन्यायानामेनि वाक्ये इति व्याप्तिरिति वाच्यमेताद्दशवाक्यस्य

॥१२९॥

सर्वतांत्रिकसंप्रदायविरुद्धतयानभ्यस्तत्वेन व्याकुलीभावात्। कथंकथायामित्थंप्रयोगः कृतः सर्वसंप्रदा
यमेवमस्थानेनेतितत्। ह्रीज्ञगवेषणव्यग्रतया चतद्वाक्यज्ञाने न तद्विशिष्टवैशिष्ट्यावगाहिज्ञानानुत्थापनेन
तस्यानुमितिचरमकारणपरामर्शप्रयोजकज्ञानाजनकत्वादित्याहुः॥ तेन चेति॥ न चात्रमानाभावः शा
ब्दज्ञानसहकृतमेवमनःपरामर्शजनकमिति वाच्यं तस्यानाप्तोक्तवाक्यत्वेनाप्रामाण्यशंकाक्रांत
तयापरामर्शाजनकत्वात्। अन्यथाप्तवाक्यजज्ञानादिव न्यायजज्ञानादप्यनुमित्यापत्तेः। त
स्मान्न्यायजज्ञानेऽप्रामाण्यशंकया तस्य क्लीप्यतेऽत्र तया तदुपरिच्छित्यनुसारेण स्वयं मनसा धूम
विशिष्टे वह्निवैशिष्ट्यमित्याकारज्ञानजननेनेतेन परामर्शोत्पाद इति स्वीकार्यं। तद्वाक्यस्य पदा
र्थमात्रोपस्थापकत्वेन प्रयोजकत्वादिति वदंति। अन्येतु मानांतरं मनो लक्षणमुत्थाप्यते॥ स्वात्म
रूपसहकारिसंपन्नीक्रियतइत्यर्थइत्याहुः॥ अनुमितीति॥ अत्र प्रथमशाब्दज्ञानातेन्याय

113

तु॰अ॰

जन्यज्ञानपरं तथा च न्यायजज्ञानजनकशाब्दज्ञानजनकवाक्यत्वमित्यर्थः। अत्र च न्यायबहिर्भूतवाक्येतिव्या
प्तिवारणाय न्यायजज्ञानजनकत्वेन तदज्ञानजनकेति। न चावयवावयवेति व्याप्तिः। तस्य न्यायज
ज्ञानजनकशाब्दज्ञानजनकज्ञानजनकत्वेन तदजनकत्वात्। अत एव कंटकोद्धाररूपवाक्येपि ना
तिव्याप्तिः। तस्यापि न्यायजज्ञानजनकव्याप्तिज्ञानजनकयोग्यताज्ञानजनकत्वेन तज्जनकत्वा
भावात्। शाब्दपदं संपातायातं। आमादावतिव्याप्तिवारणाय वाक्यपदं। एतच्च लक्षणं यन्मते
वांतरवाक्यार्थज्ञानस्य महावाक्यार्थज्ञानजनकत्वाभ्युपगमस्तन्मते न बोध्यं। यदि च तावत्संस्का
रमेलकत्वावत्पदस्मृतौ तावत्पदार्थस्मृतिरतो महावाक्यार्थज्ञानमित्यभ्युपगमस्तदास्यासंगतत्वा
पातादिति। परामर्शप्रयोजकवाक्यत्वेनेति। प्रयोजकत्वस्य जनकजनकजनकेचाविशेषादिति भावः।
न्यायत्वापत्तिरिति। वाक्यत्वस्यापि गौरवेण त्याज्यत्वादिति भावः। यदि च च सुरादेः स्वरूपसत एव हेतु

॥१२२॥

पर्वतो वह्निमान् धूमवत्त्वादित्यस्योपनये वह्निव्याप्यधूमसामान्यकानुमित्यंतरान्यूनानतिरिक्तविषयकत्वाद्द
र्शनजनके पर्वतो वह्निमानित्यनुमितौ प्रतिज्ञात्वं मा भूदित्यप्युद्देश्यपदमिति केचित्॥

तोऽन्नन्तराकांक्षेति नूतनस्य न्यायत्वं तदावितिशिष्टवैशिष्ट्येऽपि प्रथममाकांक्षा नास्तीति तस्यापि नन्तत्वमित्या
ह। आकांक्षेति। दुर्निरूपमिति। असंभवीत्यर्थः। नत्स्वीकार इति। अननुगतप्रसक्तान्नुगतधर्मस्वीकार इत्य
र्थः। अन्यथा जातिसंकरप्रसंगादिति। जातिनियामकानुगतकारणतावच्छेदकधर्मं विनापि जातिस्वी
कारे परस्परविरहसमानाधिकरणजातिद्वयसमावेशः स्यादित्यर्थः॥ किंतूद्देश्येति। अत्र न्याया
प्रविष्टप्रतिज्ञासमानाकारवाक्येतिव्याप्तिवारणाय सत्यंतं। वाक्यार्थपदं संपातायातं। न्यायांतरप्रतिज्ञा
याः न्यायांतरस्थप्रतिज्ञासमानार्थाया न्यायांतरप्रतिज्ञात्वं मा प्रसांक्षीदिति प्रथमोद्देश्यपदं। पर्वतो व
ह्निमान् धूमवत्त्वादित्यस्योदाहरणे यो यो धूमवान् सोऽग्निमानेतादृशान्तरान्यूनानतिरिक्तविषयकत्वा
द्दर्शनजनके पर्वतो वह्निमानित्यनुमितौ प्रतिज्ञात्वस्यातिव्याप्तिवारणायाऽप्युद्देश्यपदं अनुमि

119

कुअ

॥१२३॥

तोच्छिंगाभानपक्षेचैतत्॥ तत्रतज्ज्ञानपक्षेतु असंभववारणार्थंतदितिध्येयं। तथाचास्मिन्पक्षेयद्विष
यत्वेनानुमितिर्तुद्देश्या तस्यैवानुमितिविषयत्वेनविवक्षितत्वादितिनोक्तदोषइत्याहुः। प्रतिज्ञैक
देशेऽतिव्याप्तेराह ऽन्यूनेति। नचपक्षतावच्छेदकस्यावयवांतराप्रतिपाद्यत्वादन्यूनपदेनैवतद्व्य
वच्छेदेऽनतिरिक्तपदवैयर्थ्यमितिवाच्यं। यत्रपृथिवीतरभिन्नत्वाभाववत्त्वंपृथिवीत्वाभाववदिति
साध्याभावांशोदाहरणेकदेशेऽतिव्याप्तिवारकत्वादित्याहुः॥ तच्चिंत्यं॥ तत्रपृथिवीत्वस्य इतरभे
दसामानाधिकरण्याभानेनातिव्याप्त्यसंभवात्। यदिचतस्माद्धर्मिमानयमित्याकारंनिगमनं त
दायमितिपदस्यसर्वनामत्वेनबुद्धिस्थवाचकतयापर्वतत्वप्रकारकज्ञानजनकत्वान्निगमने
तिव्याप्तिवारकत्वंतस्येतिध्येयं। एवंचैतन्मतेनिगमनानवयवत्वेसतीत्यपिविशेषणीयं। अतो

॥१२३॥

वह्निमानयमिति निगमनैकदेशे नातिव्याप्तिरिति द्रष्टव्यं। न च शाब्दपदवैयर्थ्यं। घटः शब्दो गुणोद्रव्य
कर्मान्यत्वे सति सत्तावत्त्वादित्यत्रोदाहरणे यदि प्रतिज्ञारूपशाब्द एव दृष्टान्तत्वेनोपादीयते तदा त
त्रातिव्याप्तिवारकत्वात्। नहि तस्य परामर्शप्रयोजकशाब्दज्ञानजनकत्वमनुमित्यन्यूनानतिरि
क्तविषयकशाब्दज्ञानजनकत्वेनऽपि तु स्वज्ञानेनेति। विवक्षितं तु लक्षणे तथाजनकत्वमिति वदन्ति
तच्चिन्त्यं। तस्य प्रतिज्ञात्वेन संग्राह्यत्वात्। तद्विषयकस्योदाहरणस्यान्यूनानतिरिक्तविषयत्वाभावे
नातिव्याप्त्यसम्भवात्। तस्मात्संपातायातं शाब्दपदं। पक्षसाध्यवाचकपदस्याप्युक्तलक्षणसत्त्वाद
तिव्याप्तिरित्यत आह वाक्यमिति। तथा च तादृशज्ञानजनकपदसमुदायत्वमित्यर्थः। वाक्यपदस्य प
दसमुदायवाचित्वात्। न च प्रतिज्ञायां ज्ञानलक्षणयोर्द्वयोरनुमित्यतिरिक्तविषयकज्ञानजनक

ननु घटः शब्दो गुणस्सेष्टत्वेन दृष्टान्तः तदा दूषणमाह नस्येति। घटः शब्दो गुण इति वत्तु इष्येव चेत्तदा दूषणमाह। तदि

115

तुअं

ज्ञानलक्षणाया एवोपपत्तौ हेतुत्वशङ्कायाः पंचम्या ज्ञापकत्वपरत्वेनार्थत्वं न युक्तमित्यनुशयेन केचिदित्युक्तं २
ज्ञापकत्वे पंचमीत्यपिप्राय्येणेदं मतं केचिदिति २

त्वादसंभववदिति वाच्यं । वह्निमानित्यस्य हेत्वन्वयानुपपत्त्या ज्ञातव्याप्तत्वलक्षणायां हेतुत्वान्वयात् प्राञ्चां छिन्नमुख्यान्वयबोधमादाय लक्षणं संभवात् । केचित्तु तत्र ज्ञानलक्षणैवेत्याहुः । ननु सर्वं प्रमेयमित्यादिप्रतिज्ञाया मव्याप्तिः । अनुमितिविषयातिरिक्ताप्रसिद्ध्या तत्रानतिरिक्ताप्रसिद्धेः । न च न त्र विवादाभावे न संशयाभावे न च प्रतिज्ञायाः संभवान्नोक्तदोष इति वाच्यं । अनुमित्सया तादृशप्रयोगसंभवात् । किं न्वप्रकारकसंशयसत्त्वाद्वा अन्यथा केवलान्वयिलक्षणेऽग्रे तन्नं विरुध्येत । सत्त्वं सर्वपदार्थवृत्तिधर्मत्वाद्वस्तुत्ववदित्यादिप्रतिज्ञायां तथापि प्रतीकाराशङ्का न घटत्रापि केवलान्वयिसाध्यके नविवादादिर्नेत्यात् । सर्वपदार्थानुमितिविषयातिरिक्ताप्रसिद्धिः स्त त्रापीति चेत् । अत्र ब्रूमः । अनुमित्यन्यूनानतिरिक्तविषयकत्वपदेनानुमितिविषयतासमव्याप्तविषयताकत्वं विव

॥१२४॥

॥१२४॥

हितमिति नोक्तदोषः। यद्वैतदस्वरसादाह॥ लिंगेति॥ प्रतिज्ञायां वह्निमानित्यादौ मनुवर्ण्य निरूपित
संबंधस्यापि भानादनुमितौ तद्विषयत्वे मानाभावादनतिरिक्तविषयत्वमस्त्विति सिद्धमित्यप्यस्वरसः
पूर्वत्र बोध्यः। अत्रापि सत्यं तं न्यायप्रविष्टवाक्यपरमुदासीनवाक्येति व्याप्तिवारणाय। अवयवां
तरे तद्वारणाय लिंगाविषयकेति। शाब्दपदं स्पष्टार्थं प्रतिज्ञैकदेशादावति व्याप्तिवारणाय वाक्य
पदमवयवावयवान्यवाक्यपरं॥ लिंगाविषयकज्ञानजनकत्वं च न त्र्यन्यत्वाप्तेन लिंगविषयकज्ञा
नजनकत्वनियतावयवान्यत्वं तेनोदाहरणादिवत्तुष्टयावयवान्यत्वं पर्यवस्यति अन्यथा यत्र प्रति
ज्ञायां हेतोः पक्षतावच्छेदकत्वे नान्यथा वा प्रवेशस्तत्राव्याप्तिः स्यात्। न च लिंगतावच्छेदकप्रकारेण
लिंगाविषयकत्वविवक्षयैव नोक्तदोष इति वाच्यं। धूमकालादेः पक्षतावच्छेदकत्वेनयाप्यप्रतीकारात्।

116

धूमत्वेनैव तत्र धूमस्य भानात्। न च विवक्षितेऽपि तादृशज्ञानजनकत्वनियमो यदि व्यक्त्यवच्छेदेन वि-
वक्षितस्तादात्म्यादृशप्रतिज्ञायास्तदवच्छेदेन व्याप्तेः अथानुगतहेतुत्वावयवत्वाद्यवच्छेदेन तदा प्रतिज्ञात्वमव-
च्छेदकमादावयवाश्रुतेनैव सामर्थ्यं न स्यादिति वाच्यं। प्रतिज्ञात्वस्यैव लक्ष्यत्वेन तदप्रतिच्चये तदादायस-
मर्थ्यं न स्यादाकाङ्क्षत्वादिति हेतुत्वावयवत्वादेस्तु लक्षणांतरप्रमितत्वेन तदवच्छेदेन लिङ्गविषयकज्ञान-
कत्वनियमाग्रहादुक्तलक्षणार्थः सुग्रह इति भावः। निगमनेऽतोऽपि नातिव्याप्तिरित्याह। निगमन-
त्वेति। चकारोऽप्यर्थो भिन्नक्रमः निगमनं परामर्शहेतुरपि नेत्यर्थः। तथा च सत्यतेनापि तद्वारणमि-
ति भावः। न चैतदेवासिद्धमिति वाच्यं। परामर्शपदे नोपनयजन्यपरामर्शस्य विवक्षितत्वात् तत्र
च निगमनस्योदासीनत्वेनाप्रयोजकत्वात् प्रतिज्ञायाश्चाकांक्षोत्थापनद्वारा प्रयोजकत्वमस्तीति न

॥१२४॥

वसंभवइतिध्येयं अवयवलक्षणेऽवपरामर्षपदं नोपनयजन्यपरामर्षपरमतेन तल्लक्षणस्य निगम
नेनाव्याप्तिरिति द्रष्टं। अत एव परामर्षेत त्वरमत्वं विशेषणमिह नेति सर्वं सुस्थं। हेत्विति हेत्ववयवे
त्यर्थः। यद्वा वाक्यपदमनवयवपरमिति नातिप्रसंग इति भावः॥ लिंगेति॥ अत्रापि न जन्यत्वासेन पू
र्ववल्लिंगविषयकज्ञानजनकत्वेनियतावयवान्यन्यायावयवत्वमित्यर्थः। यदि च न्यायावयवपदं ना
स्ति किंतु वाक्यपदं तदा तद्वाक्यं अवयवपरं द्रष्टव्यं। लिंगिपदं कोविल्कमफलं। पूर्वं विजातीयज्ञाने
निर्वीजमुक्तमिति बीजपूर्वकं परमतामाह॥ व्यवसायादिति॥ भास्करीयमतं दूषयति। एतेनेति। यद्य
प्यत्रापि विजातीयज्ञानजनकत्वमेव पर्यवस्यति तथाप्युपाधिभेदाद्भेद इति मंतव्यं। आह तो त्विति इ
दं तापातनः। वस्तुतस्तु हेत्वन्वयानुपपत्त्या प्रतिज्ञायां ज्ञानलक्षणावश्यं वाच्याविप्रतिपत्तौ पंचनत

117

मुक्त.

॥१२६॥

घेति न तया तदन्यथासिद्धिः। न च प्रमाणाकांक्षायां हेत्वभिधानादित्यादौ ज्ञापकत्वएवंपंचमीति ना
न्वयानुपपत्तिरिति वाच्यं। ज्ञानलक्षणाया ह्युपपत्तौ हेतुत्वेन ज्ञायाः पंचम्या नानार्थत्वे केवलकल्पना
मीमांसानाभावादिति वक्ष्यते॥ तदभिधानमिति। अवयवांतराभिधानमित्यर्थः। अन्यथेति य
स्वरसोद्भावनं तद्बीजं तु शब्दानित्यत्वे प्रमाणं च्वदेत्यस्य साध्योपलक्षितस्तद्धनाभिधाननियोगपरतया
ह्युपपत्तौ साध्यस्य विशेषणत्वमुक्तयुक्त्युपष्टंभेन ग्राह्यं। तथा च सैवास्तु किमनेनेति अत एवोपसं
हारे तामेव दर्शयति। तस्मादिति। हेतुत्वं चेति। हेतुसदृशान्याया प्रविष्टत्वाद्येति व्याप्तिवारणाय कारण
त्वं तद्धि विशेषणं। तस्मादिति निगमनांशे तद्वारणाय साध्याविषयकेति भी विशेषणं। अत्र साध्यताव
च्छेदकप्रकारेण साध्याविषयत्वं विवक्षितं तेन प्रमेयादौ साध्येन साध्यविषयकज्ञानस्याप्रसिद्धि

रिति ध्येयं। नन्वैवमपि वायुः प्रत्यक्षः प्रत्यक्षस्पर्शाश्रयत्वादित्यादिहेतावव्याप्तिरिति वाच्यं। साध्यवि
षयकशाब्दधीजनकत्वमिति नियतावयवभिन्नत्वस्य विवक्षितत्वात् यो धूमवानित्यत्रोदाहरणांशेति
व्याप्तिवारणाय हेतुविभक्तिमदिति। सामान्यवत्वे सत्यस्मदादिबाह्यकरणप्रत्यक्षत्वादित्यादावाग्रि
मभागेति व्याप्तिरित्यनेनोक्ताशरपदं। तथा च शाब्दाधिक्यादर्थाधिक्यमिति न्यायेन यावदवच्छेदेन
व हेतुविभक्तिसमभिव्याहृतत्वेनावच्छिन्नशब्दत्वं विवक्षितं। प्रकृते च सति सप्तमी॰ बन्धादिविशिष्टए
व हेतुत्वान्वयात् विशिष्टरूपेव हेतुविभक्तिसमभिव्याहार इति भावः। हेतुत्वेति न्यायावयवत्वावच्छेद
कावच्छेदहेतुत्वप्रतिपादकविभक्तिमत्वं विवक्षितमिति। तस्मादित्यंशमादाय हेतुविभक्तिमत्वान्न
भिनिगमनेति व्याप्तिः। उदाहरणेति व्याप्यभिधानेत्यर्थः। उदाहरणावयवपरत्वे चाग्निमवयवप

118

॥१२७॥

दव्यर्थतापत्तेरिति भावः। साध्याविषयेति। तत्र ऊनकेत्यंतं त्राद्विशेषणं। तस्मादिति निगमनांशेति व्या-
प्तिवारणाय तदर्थश्च पूर्ववत्। उदाहरणांशेति व्याप्तिवारणाय हेतुपंचम्यंतेति। उदासीनवाक्येति व्याप्ति-
वारणायानुमितिपरेति। न्यायप्रविष्टवाक्यत्वमित्यर्थः। यद्वा अनुमितिपरशब्दत्वेन न्यायावयवत्वं विव-
क्षितं तथा च साध्याविषयकज्ञानजनकन्यायावयवत्वं हेतुपंचम्यंतन्यायावयवत्वं वा लक्षणद्वयं बोध्यं॥
पूर्वं हेतुत्वप्रतिपादकविभक्तिमत्त्वमुक्तमिदानीं तु हेतुपंचम्यंतत्वमुच्यत इति न पूर्वाभेदः। प्रतिज्ञेति। उदा-
सीनीस्याप्रतिज्ञात्वेन प्रतिज्ञावाक्यजन्यधीजन्याकांक्षानिवर्तकत्वमवयवस्यैवेति पंचम्यंतोदासीनवा-
क्ये निगमनैकदेशे च नातिप्रसंगः। सामान्यवत्त्वे सतीत्यादि हेत्ववयवा"वयवत्वे परंपरयोक्तज्ञानजनके-
ति व्याप्तिवारणाय हेतुविभक्तिमत्त्वं विशेषणं। हेतुत्वान्वितत्वावच्छिन्नवाक्यत्वमित्यर्थः। हेत्ववयवांतर्ग-

॥१२७॥

तस्य च खंडवाक्यस्य तथात्वाभावान् सामान्यवत्त्वे सतीत्यादिहेतौ सतिसप्तमीबळाद्विशिष्टएव हेतुत्वान्व
येन विशेष्यमात्रेतदनन्वयादिति भावः। यत्तु धूमवान्यतेइत्यादौ अतिव्याप्तिवारणाय हेतुविभक्तिमद्वि
तिनहितत्रपंचम्यंतमात्रेण तदाकांक्षानिवृत्तिरपितु प्रथमांतपंचम्यंताभ्यां हेतुत्वयेवेतु हेतुपंचम्यंतेनैवेति
तन्नेतस्यानवयवत्वे तत्र प्रतिज्ञाविहहेणोदासीनवाक्यवत्सर्वप्रतीकेनैव वारणात् अवयवत्वे च तद्वा
रणात्स्यान्नर्हत्वादिति। पंचम्यंतेति। न्यायाप्रविष्टहेतुसदृशवाक्येतिव्याप्तिवारणानुमितिपरेति न्या
यप्रविष्टेत्यर्थः। निगमनेति व्याप्तिवारणाय ळक्षणांतिकेति। तस्मादितिसर्वनाम्नश्च बुद्धिस्थवाचक
तया तस्यार्थस्य बुद्धिस्थवाचकतया तस्यार्थस्य बुद्धिविषयत्वेत्रत्येव। तदविषयत्वे ळक्षणायाअ
प्यसंभवेन सर्वथा तत्र ळक्षणायाअव्युत्पत्तेः। प्रतिज्ञायामपि साध्यपदे ळक्षणेति तत्रातिव्याप्तिरत

19

आद्राप्रत्यन्नेति। नचतत्र लक्षणायामानाभावः। साध्यस्य हेतुवाक्यार्थे न हेतुत्वान्वयासंभवात् तस्य तद
कार्यत्वादिति। अत्र वदंति। न हि हेतुवाक्येन कारकोहेतुरभिधीयते। किंतु ज्ञापकः। साध्यनिर्देशानंतरं
कुत इति प्रमाणाकांक्षायामेव तत्प्रयोगात्। पंचम्या अपि तत्र ज्ञापकत्वरूपहेतुत्वपरत्वात्। तथा च हेतु
वाक्यार्थे ज्ञापके ज्ञाप्यस्य साध्यविषयत्वेनैवान्वय इति न साध्यपदे ज्ञानलक्षणा। अत एव भास्क
राद्यैस्तथैवकं तः प्रतिपादितं उद्देश्यानुमित्यन्यूनेत्यादिग्रंथे प्रतिज्ञालक्षणाकृत वोगंगेशस्यापि
एतदेवाभिमतं अन्यथा प्रतिज्ञायाः साध्यज्ञानविषयत्वे अनुमितेश्च तदविषयत्वेतल्लक्षणातिव्या
प्तिरिति चेत्। अत्राहुः। पंचम्या ज्ञापकत्वं शास्यावालक्षणया वा। न द्वितीयः सुप्तविभक्तौ लक्षणा
याः अन्याय्यत्वात्। नाप्याद्यः एकार्थत्वेसंभवत्यनेकार्थत्वायोगात्। प्रतिज्ञालक्षणं च यथा सुखं

॥१२०॥

ता

तथोक्तं यत्तु यदि प्रतिज्ञायां न लक्षणात् तदा पंचम्यंतपदं मत्र लक्षणे व्यर्थं स्यात् न च पर्युदासं न द्विल
क्षणिकपदवत्त्वं वयवांतरेतिव्याप्तिवारणाय तदिति वाच्यं। लाक्षणिकपदवत्त्वेन तादृशानियतानु
मितिपरवाक्यत्वस्यावश्यं वाच्यत्वेन तत एव दृष्टांतत्वेनोपादीयते तदा तदंशे तिव्याप्तेर्वज्रलेपत्वा
पातात्। तत एव तादृशावयवांतरवारणात्। अन्यथा यत्रोदाहरणविशेषे धूमवत्त्वादित्यादिहेत्ववय
व एव दृष्टांतत्वेनोपादीयते तदा तदंशेतिव्याप्तेर्वज्रलेपत्वापातात्। न च प्रकृतसाध्यप्रतियोगिहेतु
पंचम्यंतगर्भतयोक्तातिव्याप्त्यसंभवः। तत्प्रयोगं हेतोरपि तत्प्रयोगोदाहरणदृष्टांतत्वसंभवादि
ति। तन्न। उदाहरणांशविषयीभूतस्य हेत्ववयवत्वेनसंग्राह्यत्वात्। तत्प्रतिपादकस्योदाहरणांश
धूमवत्त्वादिति शब्दवत् इत्यादेर्महानसवदित्यादिवत् पंचम्यंतत्वाभावेन नियमविवक्षायां अयुक्त
त्वात्। लाक्षणिकपदवत्त्वमुपपादयति। हेत्विति। अहेत्वेनेति। अतीतादौ व्यभिचारादिति भावः॥

120

नचैवं स्वायत्तः शब्दप्रयोग इति न्यायात् धूमज्ञानादिति प्रयोगापत्तिः। कटं करोतीत्यादिवन्निरूढलक्ष
णया ज्ञानज्ञानलाभापत्तेः। ननु हेतुपदे यदि ज्ञानलक्षणा तदा वृत्तिद्वयविरोधेन ज्ञानमात्रमुपति
ष्ठेत न तु विषयोपि धूमादिः। तथा चानुपस्थितेन तत्र गमकत्वाकांक्षा न स्यात् प्रस्तुतलिंगज्ञानेन गम
कत्वाकांक्षा स्यादिति तस्यैव गमकता प्रयोजकव्याप्त्यादिविषयकत्वरूपमुदाहरणाभिधेयं प्रसज्ये
त। किंच अवयवेनानुमित्यंगज्ञानमुत्पादयितुमर्हं लिंगज्ञानं च तथा न तु लिंगज्ञानज्ञानं। त
स्मात् लिंगस्यानुमित्यजनकतापक्षेपि धूमादिपदं शक्त्यैव च न हेतुतायां किंतु अनुमितिजनकज्ञा
न विषयत्वलक्षणे अनुमितिप्रयोजकत्वमात्रे इति चेत्। अत्र वदंति। यद्येवं वृत्तिद्वयविरोधस्तदा पाका
[illegible] मित्यनन्वितं स्यात्। अभेदोपचारेपि वृत्तिद्वयविरोधेन रक्तेः स्यादनुपस्थित्या हेतोस्तत्राकांक्षावि

॥१२१॥

रहात्। यदि च तत्तस्य तयापि तत्राकांक्षा यदि वा यद्धिये न विनाभासत इति न्यायादुक्तलक्षणायैव तदुपस्थि
तेस्तत्राकांक्षा तदा प्रकृतेपि तुल्यं। तद्विषयकज्ञानस्यापि तन्निरूपणाधीननिरूपणत्वेन ज्ञानलक्षणायैव
तदुपस्थितिसंभवात्। अत एव द्वन्द्वसमासेन्यपदार्थलक्षणादौ लंबकर्णादिविशिष्टव्यक्तिज्ञानं। नन्वेव
मुपस्थितस्यापि विषयस्य विशेषणत्वाद्विशेष्य एव ज्ञाने गमकत्वाकांक्षा स्यादिति चेत्। इष्टापत्तेः। गमक
त्वं हि ज्ञानजनकत्वं तच्च लिंगज्ञानस्यैव न तु लिंगस्य तथा च कथमस्य गमकत्वमित्याकांक्षायामपि त
त्रैव व्याप्यविषयतया च तस्य गमकत्वमिति तद्विषयीभूते लिंगे व्याप्त्युपदर्शनायोदाहरणमपि
तादृशं संगच्छते। अस्तु वा लिंग एवाकांक्षा तथापि भानानुपपत्तिः। लाघवेनोपस्थितिमात्रस्य तत्र तत्त्वेन वि
शेषणतयापि तदुपस्थितेस्तत्संयोजकत्वात्। यच्चोक्तं पंचमी न हेतुतायामित्यादि॥ तन्न। हेतुत्वस्यैका

(१२)

याः पंचम्या विवक्षितार्थे लक्षणापत्तेः। सुपि विभक्तौ च तदनुपपत्तेः। न च तत्वज्ञानान्निःश्रेयसाधिगम इत्यन्यत्र कृ
वत्प्रयोजकत्वं पंचमीति वाच्यं। अनन्यथासिद्धत्वांशमहाय विशिष्टशक्तया अपि पंचम्या विशेष्यभाग
नियतपूर्ववृत्तित्वे तात्पर्यात्। न च पदार्थैकदेशे तया तत्रापि लक्षणैवेति वाच्यं। विशेषणांशे पदार्थैकदे
शे अन्यान्वितत्वेनोपस्थिते निराकांक्षतया आकांक्षास्थापनाय स्वतंत्रोपस्थितये तत्र लक्षणास्वीका
रात्। ननु साकांक्षे विशेष्यभागेपीति। अस्तु वा तदनुरोधान्नियतपूर्ववृत्तित्व एव शक्तिः पंचम्याः तथापि

प्रकृतेन संगतिः। उक्तप्रयोजकत्वस्यापि पंचम्यर्थत्वे प्रमाणाभावादिति। यत्तु धूमविशिष्टज्ञानं एव ल
क्षणेति धूमोपस्थितिः। विशिष्टलक्षणायां च गंगाविशिष्टतीरोपस्थितिरिष्टैवेति। तत्र लक्षणावसरे वक्ष्
याम। अनंतरोक्ते अन्येषां मतं परैर्या युक्तिरुक्ता तां दर्शयति। ज्ञातिविनेति। अत्र तादृशज्ञानेन जनके

तावच्छेदकसत्वेनतदेव लक्षणमस्त्वेतदपि दुर्ग्रहमित्यस्वरसबीजं पूर्वमुक्तमत्रतूक्तप्रायमिति नेह दर्शितं॥
अन्वयेति। अत्र जनकान्तं केवलव्यतिरेकिण्यतिव्याप्तिवारणाय। प्रतिज्ञाया अपि परंपरया तत्प्र
योजकत्वात्तद्वारणाय हेतुविभक्तिमदिति॥ अत्रोदासीनवारणायेति व्याप्तिवारकत्वेनोपात्तयोः प्रथमेऽव
रमाये चावयवपदयोरन्यतरगर्भलक्षणद्वयं बोध्यं। अन्यथान्यतरपदवैयर्थ्यापत्तेः॥ नन्विदमन्व
यिव्यतिरेकिहेतावतिव्याप्तं। न चान्वयव्याप्तिमात्राभिधायकत्वं विवक्षितमिति वाच्यं। केवलान्वयिहेतौ मा
त्रपदव्यवच्छेद्यव्यतिरेकव्याप्त्यसिद्धेरिति चेत्॥ न॥ अन्वयव्याप्त्यभिधायकावयवमात्राभिधानप्रयोजके
तिविवक्षणात्। न चैवमात्रपदव्यवच्छेद्याभावः। व्यतिरेकव्याप्तेरभावेपि विशेषादर्शनदशायां तदभिधा
यकावयवप्रसिद्धेः। तस्यतीतिजनकस्यैव तदभिधायकत्वात्। दशाविशेषेऽन्वयव्यतिरेकिहेतुः संग्रा

कु॰ अ॰

ह्यएवेत्याहुः॥ नन्वकेवलान्वयिनिसंग्रहायाभावेन न्यायानवतारात्तदीयोहेतुःसंग्रह्योनास्त्येवेतिवाच्यं।
अनुमितेस्यापिप्रयोगसंभवादितिभावः। पक्षेति। पक्षसत्त्वादिमतोऽर्थस्यप्रतिपादकोहेत्ववयवइत्य
र्थः। अत्रचसद्धेतुविषयकएवहेत्ववयवःसंग्राह्यइतिस्वरूपासिद्धविषयकावयवेतिव्याप्तिवारणाय
पक्षपदं। एतच्चोपलक्षणमबाधितत्वाद्यपिबोध्यं। असाधारणविषयकावयववारणायव्यतिरेकि
हेत्वतिव्याप्तिवारणायचसपक्षपदं। व्यभिचारिविरुद्धविषयकेवारणायकेवलान्वयिहेतुवारणा
यचविपक्षासत्त्वइतिएवमग्रिमलक्षणेपिबोध्यं। एवंचेन्नव्याख्यायतेतदावारणीयहेत्ववयवस्य
पदान्तरेणैववारणात्। प्रथमलक्षणेपक्षपदंद्वितीयलक्षणेपक्षसपक्षपदंचानर्थकमापद्येतेतिभा
वः। दृष्टाविशेषान्वयिधीसाधारणंलक्षणमाह। अनुमितीति। अत्रकारणांतमुदासीनवारणाय। तस्मा ॥१३१॥
दिवह्निरितिनिगमनांशेऽतिव्याप्तिवारणायसाध्याविषयकेतिशाब्दपदस्पष्टार्थं। केवलव्यतिरेकिण्य

तिव्याप्तिवारणायप्रतीतान्वयेति।प्रतीतान्वयमात्रेत्यर्थः।प्रतीतान्वयंयस्साध्येतस्ययत्साधनेतद्भाव
कमित्यर्थः।योयोधूमवान्नित्यत्रोदाहरणांशेतिव्याप्तेराह।हेतुविभक्तिमदिति।दश्याविशेषव्यतिरेकिसाधा
रणंलक्षणमाह।एतदेवेति।व्यर्थत्वादिति।पक्षधर्मतायास्तदानीमनाकांक्षितत्वेनमीमांसकवत्तद्बोधना
यमनुद्दिष्टोनप्रयोक्तव्यः।तथाचसतिअनाकांक्षिताभिधानेअर्थान्तरापातादितिभावः।केचित्तुव्यर्थ
त्वाद्यर्थविशेष्यत्वादित्यर्थः।धूममात्रस्यैवव्याप्यत्वेनसंबंधस्यगुरुत्वादितिव्याचक्षते।तन्न।धूमवत्त्व
स्यापिव्याप्यत्वेनव्यर्थत्वाभावात्।समानाधिकरणावच्छेदकद्वयसमावेशेअन्यतरलाघवस्यैव
तद्बीजत्वात्।नचैवंधूमवत्त्वादित्युक्तेतद्दुष्कार्थान्तरमपिनशक्योद्भावनं।यतःपक्षधर्मतार्थमयामनुपप्र
योगोनकृतःकिंतुविशिष्टएवहेतुरित्युक्तापरेणपरिहारकारणंसंभवादितिवाच्यं।उदाहरणोपनया

न्योमेव हेतुपरिच्छेदात्। नहि धूमवत्त्वे हेतौ यत्र धूम इत्युदाहरणं धूमवांश्चायमित्युपनयो वाभ्युपगम्यते। किं
तु यत्र धूमवत्त्वमित्युदाहरणं धूमवत्त्ववांश्चायमिति तदुपनय इष्येत्याहुः। एवं यत्र वह्निव्याप्यो धूम इत्येवो
पनयः स्यात्। ननु अयोर्व्यर्थत्वात्। यदि च कथकसंप्रदायानुरोधात्तत्र तथा तदा प्रकृतेपि तुल्यं। एवं प्रति
ज्ञादावपीति चिंत्यं। सप्तमीबळादिति। विरुद्धार्थिकाया एव विभक्तेर्विभज्यमानसान्वयविरोधित्वात्। अ
तएव प्रतिबंधकान्यस्य सत इत्यादिहेतुरविकळ इति भावः। व्याहतेरिति। विशेषणत्वेनास्याः प्रथमो
पस्थितायाः प्रथमाकांक्षाविषयत्वादित्यर्थः। पक्षधर्मतायाश्च वैशिष्ट्यस्वरूपत्वेनानत्वादिति भावः॥

॥१३२॥

केचित्तु सकळवादिसिद्धत्वमेव व्याप्तेः प्राथम्यं। पक्षधर्मतायास्तु परिस्रवितेत्यादौ कश्चिदप्रतिपद्य
तेपीत्याहुः। नन्वप्रदर्शनायेति। व्याप्तिर्यथोदाहरणेन प्रदर्श्यते तथोक्तं प्राक्। ग्रंथकृदभिमतव्या

ह्युपदर्शकत्वं च परंपरयोदाहरणस्य द्रष्टव्यं। पदार्थविषयावाक्यार्थविषयावा तत्तस्तद्लाभात्। किं तु ते न
सहचारे बोधितमानसो व्याप्तिग्रहो भवतीति॥ तत्रेति॥ अत्र ज्ञनकं तमुदासीनवारणाय न्यायज ३ ज्ञानजे
नकेपरं। प्रतिज्ञादिवारणाय बोधजनकेत्युक्तं। निरूक्तसंबंधबोधजनकत्वं तद्बोधतात्पर्यकत्वमुपनये
च पक्षधर्मताबोधतात्पर्यमिति न तत्रातिव्याप्तिः॥ यद्वा तत्संबंधविधायकत्वमित्यर्थः॥ उपनयस्य तु तत्संब-
धानुवादकत्वमिति। शब्दपदं वैयावर्त्ववच्छेदेन तत्संबंधबोधकत्वं तावत्पदसमुदायपरं। तेनोदाहरणैकदे-
शेनातिव्याप्तिः। सामान्यलक्षणइति। व्याप्यत्वाभिमतेत्यादिलक्षणइतिशेषः। केस्यचिन्मतेमपाकरोति।
न्यायेति। न्यायावयवत्वे सति दृष्टान्तप्रतिपादकत्वमित्यर्थः। उपनये तु उपलक्षणे निगमने नातिव्याप्तिरपि द्रष्ट-
व्या। अन्य इत्यस्य स्वरसप्रदर्शनं तद्बीजं च तादृशज्ञानजनकत्वमनुगतावच्छेदकासत्वे दुर्ग्रहं तन्नस्त्वे-
व तदेव लक्षणमस्त्विति द्रष्टव्यं। अत्र व्यभिचारेति॥ व्यभिचारिसाधारणसाध्यसंबंधमात्रप्रतीतिप्रसंगस्य
वारणाय वीप्सामाहुरित्यर्थः। तेन नवीप्सितशब्देनयावत्साधनाधिकरणोपस्थितौ नत्रसाध्यवत्त्वविधौ ना

124

त्। यावत्साधनाश्रयाश्रितसाध्यसंबंधरूपाव्याप्तिर्ग्रहीतेति भावः। ग्रंथकृतं दर्शितमतव्याप्तिपदे विशिष्टसामा
नाधिकरण्यरूपायास्तस्या वीप्सा अप्पदर्शनाकांक्षयेति विवेयं। ननु तत्रापि व्यभिचारवारणाय सा। तथा च तयास
कलसाधनाधिकरणे साध्यवत्त्वबोधनात् व्यभिचारज्ञाकोऽसुन्यसहचारदर्शनाद्भवतु मानसो व्याप्तिग्रह इति चे
त्। यद्युदाहरणस्य व्यभिचारोज्ञाननविरोधीज्ञानोत्पादकत्वमनुमतं तदा व्याप्त्युपदर्शापकत्वस्यापि संभवात्
व्याप्तिग्रहस्य मानसत्वोपवर्णनविरोधात् व्यभिचारिज्ञानविरोधीज्ञानविषयस्यैव व्याप्तित्वोचित्यात्। यत्र
ति। ननु सामानाधिकरण्यमात्रं व्यभिचारिसाधारणं तदप्यकेवलान्वयि विशिष्टसामानाधिकरण्यमेवोक्तं व्या
प्तित्वेनाभ्युपेयं। तल्लाभश्च पदिकोक्तां विनापि स्याद्धूमादावपि स्यान्न चेत्। तदा केवलान्वयिन्यपि तां विना न
तल्लाभ इति तत्राप्युपादेयैव सा। न च धूमादौ व्यभिचारसंशयासंभव इति अत्रैव नेति विशेषोऽस्तीति वाच्यं। हेतुसमा
नाधिकरणात्यंताभावप्रतियोगि साध्यं न वेति संशयस्यापि तत्रासंभवात्। न च केवलान्वयित्वे न ज्ञाते तदस
भवेनात्। इति तत्रैव न तदनुपादानमिष्टं नान्यत्रेति वाच्यं। स्वकर्तव्यत्वेन तत्रापि तदुपादानस्य कर्तुमुचितत्वात्
। अन्यथा केवलान्वयित्वेनज्ञातस्य लिंगस्य पक्षधर्मतापि नोपदानेऽपि तथात्वेव कथकसंप्रदायविरो

घ:। असाधकताप्रयोगेचानीपमानंउभयवादिसंमतिविषयतयाकथकसंप्रदायसिद्धतयावन्याय्यउपन्यास:
किंचयदिकेवलान्वयिलिंगेनज्ञानेव्यभिचारशंकानिरहात्। विप्सानुपादानं तदासहचारशंकायाअप्रभावस
हचारबोधनप्रयोजनमप्यस्यनास्तीतिउदाहरणमेवनक्रियेत। यदिचसहचारज्ञानंविनामानसापिनव्या
प्तिग्रहइतितद्बोधनायतदुपादानंतदाव्यभिचारज्ञानंविनापिततोनव्याप्तिग्रहइतिरनद्वित्रिक्षसामानाधि
करण्यज्ञायवीप्साघटितमुदाहरणमावश्यकंएवंचभेदानुमानेविपक्षादयेवतथ्यचावस्थाभेदेननानव
पुरस्कारानुकस्यपक्षत्वंदृष्टान्तत्वंचनविरुद्धमितिवीप्सानानुपपन्नेति। तस्माद्त्रसमाधानंचिंत्यं॥ वीप्सा
यामपिव्यभिचारतादवस्थ्यमितिवयमिति। अनेकव्यक्त्युपस्थापनसमर्थायाअपिवीप्साया:साधनाधिकरणादि
त्रिव्यक्त्युपस्थापनेपिचरितार्थत्वसंभवादधिकरणान्तरेसाध्यवत्वाग्रहात्ततोनव्याप्तिग्रहइत्यर्थ:। ननुवीप्स
याव्युत्पत्तिबलाद्व्याप्तिग्रह:स्यात्। तथाहि। वीप्सितशब्दश्रवणानंतरंद्वितीयपदस्यपालुवादकतयाप्रयोजनजि
ज्ञासायांव्युत्पत्तिबलाद्व्याप्तितात्पर्यकल्पेगृहीतेव्याप्तिबोधस्यैवप्रयोजनतयाप्रथमपदोपस्थाप्यव्याप्तिन्नं

सर्वसाधनाधिकरणं तदन्यत्वेनानुगतेन रूपेणोपस्थाप्यते। एवं च सर्वत्र साधनाधिकरणे साध्यवत्त्वबोधनाद्भवति व्याप्ति
ग्रह इति चेन्न। हन्त एवं व्युत्पत्त्यादरे वीप्साविनैव यमोगप्राथम्याभ्यां व्याप्तितात्पर्यकत्वनियम इति व्युत्पत्त्यंतरादेव
सर्वत्र सिद्धादन्यत्र कूष्माले इत्युद्भवति यत्पदादेव यावत्सामानाधिकरण्योपस्थितौ वीप्सावद्यापि ग्रहसंभवे किं
गुरुणा वीप्सादरेण। यद्योगप्राथम्यव्युत्पत्तिपुरस्कारेण न लघ्व्या ... रेणोदाहरणे संभवति न वीप्साव्युत्पत्त्या
दर इत्यत्र तात्पर्यं। ननु वीप्साव्युत्पत्त्यादरेपि व्यभिचारतादवस्थ्यमित्यत आह। तद्विमुक्तमेव यद्योगप्राथम्याभ्यामेव
व्याप्तौ लब्धायां वीप्सावधारणस्फुट इति विप्सया व्याप्तिलाभमभ्युपेत्याह। वीप्सा चेति॥ यद्यपि तत्पदे वीप्सायामपि नान
न्वयस्तत्रापि यत्पदोपस्थापितयोः प्रत्येकं तत्पदद्वये न परामर्शसंभवान्न यथा सा सा द्वियान प्रमुखी बभूवेत्यत्र तत्पदापि
एकपदोपादानादेष्टिमतस्ति द्विसंभवे द्वितीयपादात्पदेन घयत्नेगोरुवमितित्यपिप्रायेण तदुक्तमिति द्रष्टव्यं। विस्तरेणेति। यत्प
दद्वयाद्भिन्नरूपेणोपस्थितयोरपि केनचिदेकेन धूमवत्त्वादिरूपेण तत्पदेन परामर्शसंभवादित्यर्थः। अत्र वदंति॥ नि
त्यवीप्सयोरित्यनेन सूत्रेण वीप्सायां सुबंतस्यैकपदस्यैकस्थाने पदद्वयात्मकः समुदाय आदिश्यते। वीप्सा च तत्पदद्वय
ययोक्त्या पुनरुक्त्या व्याप्तिश्च तदभिधेयस्य साकांक्षे नापरपदार्थेन दह संबंधः। तथा च तत्पदद्वयसमुदाय एकापद

॥१३४॥

तामापन्नो वयवद्वयवृत्तिशक्तिपुरस्कारेण युगपत्साकल्ये नैवस्वघ्नतिपादघमुपस्थापयतीति व्युत्पत्तिरवसीयते अ
तएव समुदायस्य कैसकलस्वावयवार्थोपस्थापकत्वं एकपदं तं वपुरस्कृत्य तत्र बहुवचनापत्तिर्नेष्टिरित्यत्र नकार
स्यणत्वं वारकं व्यपरिहतवान्न्यासकारः। तस्माद्वीप्सायामपि व्याप्तिवारतादवस्थ्यमित्यसंगतमेवा। यस्पदद्वयसमु
दाये न हेतुमत्त्याबुद्धिस्थानां साकल्येनैपवोपस्थापनात्। एवं च विरूपोपस्थितयोरपीत्यपप्यसंगतं न हि त
त्रयत्पदद्वयं मिथो निरपेक्षं परस्परविलक्षणरूपद्वये न सकलस्वाभिधेयमभिधत्ते किं त्वेकेनैव रूपेणात्मसमुदा
यएव। अन्यथा यद्यद्धूमवद्वित्यत्र यप-द-पदद्वयान्वयार्थं धूमवत्पदस्याप्यतिप्रसंगादिति। अत्र ब्रूमः। वीप्सायामम
पि व्याप्तिचारतोऽरतादवस्थ्यमित्यस्मानुमितिहेतुव्याप्त्यग्रहतो दवस्थ्यमित्यर्थः॥ ग्रंथकृन्मते ह्यन्योन्याभावगर्भव्या
प्तिरनुमितिहेतुः। सा च वीप्सयोक्तरीत्या सकलसाधनाधिकरणे साध्यवत्त्वोपस्थापनेऽपि नोपस्थापयितुं न शा
क्यते। अन्योन्याभावादिवाचकपदाभावात्। एवं च वीप्सायाः सर्वस्मिन्साधनाधिकरणे साध्यसहचारोपस्था
सत्वे अस्तु वा यद्व्याप्तिग्रहानुकूलसहचारमात्रोपस्थापकत्वमुदाहरणस्य तदा किं वीप्सया। न च वीप्सायाः स
र्वस्मिन्साधनाधिकरणे साध्यसहचारोपस्थापकत्वविशेष इति वाच्यम्। सहचारज्ञानत्वेनैव तस्य व्याप्तिग्राहकत्वे

म.नु.अ.

तस्य विशेषस्यानादरणीयत्वात्। एवं च यावत्साधनाश्रयाश्रितसाध्यसंबंधरूपाया अपि व्याप्तेर्व्यभिचारिव्याप्तत्तत
या वीप्साबले नोदाहरणप्रतिपाद्यतया चानुमित्यनुकूलत्वाभ्युपगंतारं प्रत्याह वीप्सा वेति। यापीमां व्याप्तिमनुकूलेनेच्छ
ति तस्यापि तत्पदेन वीप्साविष्फफेतां विनापि तल्लोभादित्यर्थः। नच तथापि विरूपोपस्थितयोरित्ययुक्तमेव समुदायस्यै
केन रूपेणोपस्थापकत्वादिति वाच्यं। गौरवेण समुदायस्याशक्ततया अनुपस्थापकत्वे नयत्पदद्वयस्यैव प्रत्येकं भिन्न
भिन्नरूपेणोपस्थापकत्वात्। अतएवावयवद्वयेऽपि वृत्तिशक्तिपुरस्कारेण समुदायस्योपस्थापकत्वमिति तत्रापि स्वीकारः॥
नन्वेवमाट्यापत्तिः। धूमवत्पदे न युगपदेवानेककारकान्वितैनेकक्रियापदेनेवोभयालयवोधजननात्। यथावनाद्य
ति ग्रापि तथाग्रे ग्रंथकृतैव वक्ष्यते॥ अत्र च यो धूमवानित्युदाहरणं धूमे हेतौ न युज्यते तेन हि मूनुवर्ध्यसामानाधिकरण्यं
प्रतिपाद्यते न तु धूमस्य सामानाधिकरण्यं धूमस्याधेयतायाः पर्वतस्याधारतायाश्चाप्रतीतेः। किंतु धूमसंयोगस्याधेयताभा
सते। तस्माद्यत्र धूमस्तत्र वह्निरित्येवोदाहरणं तत्रोचितमिति वदंति॥ अत्र ब्रूमः॥ एवं पर्वतो वह्निमानिति प्रतिज्ञा वह्निव्या
प्यधूमवांश्चायमित्युपनयस्तस्माद्वह्निमानिति निगमनं च न स्यात्। वह्न्यादेराधेयतायाः पर्वतस्याधारतायाश्च ततोऽप्रती
तेः। नच तत्रापि पर्वतवह्निरित्याद्येव प्रतिज्ञादिकमिति वाच्यं। कथसंप्रदायविरोधात्। यदि च वह्न्यादिविशिष्टसंबंधाधेय
ताप्रतीतौ विशेषणांशस्य वह्न्यादेरप्याधेयतेति मन्यसे तदा तत्रापि तुल्यमिति॥ इदं चेति॥ संप्रदायमते न सामपिक

स्व

१२४।

॥१२४।

अन्यथानुपपत्त्यैऽव्याप्तिः तस्यानुमितिहेतुत्वं तच्चरमपरामर्शजनकत्वात्वैवात् तस्य विशिष्टज्ञानादित्यवहितत्वात् ।१४

दृष्टान्तसहितोदाहरणाभिप्रायेण वा दृष्टान्तस्य साध्यादिवैकल्ये नोदाहरणाभासत्वं बोध्यं। यद्यप्युभयवैकल्येऽपि साध्या
दिवैकल्यमस्त्येव तथाप्युक्तं तावता केवलस्यापनायत्तेनापि रूपेणोपष्टम्भगुणद्भावनमिति पृथगुपन्यास इति बोध्यं॥ अनुपदर्शि
तेति। यथा महानसमिवेत्येवमत्रोदाहरणमित्यर्थः॥ विपरीतेति॥ योऽग्निमान्स धूमवानिति यत्रोदाहरणमित्यर्थः। एवमग्रेऽपि॥
अत्रावयवान्तराभासत्वं कथं नोक्तमिति चिन्त्यम्॥ अनुमितीति। अनुमितिकारणीभूतव्यापारसमानाकारज्ञानजनकावयवत्व
मित्यर्थः। यद्यपि तस्मादिति निगमनेन तच्छब्देन व्याप्तिपक्षधर्मपरामर्शोक्तज्ञानजनकत्वं सम्भवति। तथापि साध्यव्याप्यविशे
षणकं पक्षविशेष्यकपरामर्शसमानाकारज्ञानजनकत्वं नास्तीति न तत्रातिप्रसंग इति भावः। ननु परेषां तृतीयलिंगपराम
र्शहेतुतांगीकार एव नास्ति कुतस्तल्लाभायोपनय इत्यत आह। तदनभ्युपगमेऽपीति तथा चोदाहरणानन्तरं पक्षधर्मतामात्रस्या
प्युपदर्शनार्थमेव अवयवान्तरं परैरपि स्वीकर्तव्यमेव। व्याप्तिविशिष्टपक्षधर्मताप्रदर्शकं तत्किमर्थं कर्तव्यमित्यत आशिष्यते
तेत्तृतीयलिंगपरामर्शहेतुत्वव्याप्त्यवस्थापनादेव निरस्तमिति भावः॥ तच्चानुमितीति। अत्रोदासीनवारणाय कारणोयं ते सा
ध्यधीविशेषणं। प्रतिज्ञातीति व्याप्तेराह व्याप्तेत्यादि। साध्यधीजनकत्वं साध्यधीज्ञानजनकत्वं प्रतिज्ञायामिव निगमनेऽपि सा
ध्यपदस्य लक्षणया ज्ञेयपरत्वादिति भावः। पर्याप्तेरिति। प्रतीतेरित्यर्थः। अपर्यवसानादिति। साकांक्षत्वादित्यर्थः॥
अथेति। अभिधानं चोऽस्मादि निशिष्टलिंगानुभवः। अभिधेयं तथाभूतं लिंगं आकांक्षास्तित्वनुर्वेवावयवेषु द्वारमित्यर्थः॥

127

ननु यावत्पक्षे साध्यविपरीतदर्शकाभावान्नाभिधेयं पर्यवस्यति। न हि संभवति पक्षे साध्याभावो व्याप्त्यादिविशिष्टत्वलिं-
गमिति तथा चाभिधेयापर्यवसानादेवात्राकांक्षा स्यादित्यत आह॥ विपरीतेति॥ साध्यविपरीतदर्शकानिराकरणेऽपि पक्षे सा-
ध्यसत्त्वोपदर्शकात्प्रतिज्ञालक्षणादवयवात्तदेवाभावादित्यर्थः॥ अंशेति। प्रतिज्ञायास्तदनिवर्त्तकत्वादित्यर्थः। न हीति।
न हि निगमनमपि विशेषदर्शनं तत्पक्षनिष्ठसाध्यसत्त्वोपदर्शकत्वात्स्वरूपाभिधानादस्यानिवर्त्तकमित्यर्थः॥ सिद्धेति॥ प्रतिज्ञा-
त्वसाध्यनिर्देशा इति पक्षनिष्ठसाध्यवत्त्वोपदर्शकत्वे विशेषेऽपि निगमनं भवतन्निवर्त्तकं ननु प्रतिज्ञेति भावः॥ स्वरूपेति।
सिद्धत्वप्रतिपादकपदादेरभावान्निगमनस्यापि साध्यविशिष्टपक्षमात्राभिधायकत्वमित्यर्थः। प्रत्युत साध्यनिर्देशत्वमेव
वास्तीत्याह॥ साध्यत्वेति॥ अन्यथा प्रतिज्ञायामपि सिद्धनिर्देशत्वापत्तौ पुनरुक्ततैव तन्निवृत्तिसंभवे अस्य वैफल्यमेव
स्यादिति भावः। समीहितेति। निर्वाहादिति। उद्देश्यानुमित्युत्पादननिर्वाहादित्यर्थः। तथा च निगमनं विना तात्पर्यविषयीभूतता
बाधितत्वासत्प्रतिपक्षितत्वान्वितार्थाभिधानापर्यवसानमेवावयवान्तराणां तेन सहाकांक्षेति भावः। प्रयोजकत्वमिति।
प्रयोजकत्वमनुमितिजनकत्वमित्यर्थः। असिद्धश्चेति। तेन विना स्वार्थानुमित्युत्पादकत्वं नादित्यर्थः। यदनुगम इति। अयं च निय-
मः परोक्षज्ञाने बोध्यः। अन्यथा परामर्शभावज्ञाने सति प्रत्यक्षं न भवति। न चैतत्तदभावज्ञानं साध्यमिति व्यभिचारः स्या-
दिति। अत्रैकेचित्। अबाधितत्वादिज्ञानस्यानुमितिहेतुत्वे लाघवेन परामर्शस्यैव तद्विषयत्वेनानुमितिहेतुत्वं वाच्यं। ननु

॥१३६॥

तद्विषयकंज्ञानांतरगौरवात्। तथा चापसिद्धांतः। तथा च परामर्शविषयाभाववत्तया बाधितत्वस्य प्रतिपन्नितत्वयोरसि
द्धित्वमेव स्यात्। नन्वसिद्धिभिन्नत्वं न नातयोर्ज्ञानस्य साक्षादनुमितिप्रतिबंधकत्वं स्यात्। परामर्शविघटनद्वारैवा
स्यप्रतिबंधकत्वसंभावात्। तथा चापसिद्धांतः। किंच बाधस्य पक्षीयसाध्याभाववत्तया तदभाववस्य पक्षीयसाध्यरूपत
यासाध्यज्ञानं साध्यज्ञाने हेतुरिति पर्यवसितं तच्चासंगतं सिद्धसाधनप्रसंगात्। यदि च साध्याभावप्रमा बाधस्तदास्य
परसाधारणसाध्याभावप्रमाविरहस्य बाधाभावसत्त्वसाध्यसत्त्वनिश्चयं विना निश्चेतुमशक्यएवं तथा च तत्राप्यबा
धितत्वनिश्चयसाध्यनिश्चयोपीक्षणीय इत्यबाधितत्वनिश्चयस्यानुमितिहेतुकत्वमापद्येत। इति महदसमंजसं। तस्मा
द्यदवगमे सति यन्न भवति तत्तदभावज्ञाने सति भवत्येवेति परस्य बाधादिज्ञानप्रतिबंधकाभिप्रायेण बाधितत्वादिज्ञा
नं बोध्यते। ननु तज्ज्ञानमप्यनुमितिहेतुरित्यभिप्रायेणेत्यत्तु:। वस्तुतस्त्वनुमितौ गुणानुरोधेन योग्यताज्ञानवसं
ज्ञायनिश्चयसाध्यावधारणम् अबाधितत्वज्ञानं हेतुरित्यग्रे एव वक्ष्यते। तथा च हेतुत्वाभिप्रायेणैव तद्बोधनमिति मंतव्यं। असि
द्धिलक्षणं नान्यथैव वक्ष्यामः। ननु निगमने नाप्यबाधितत्वादिबोधनं प्रतिज्ञातार्थस्य सिद्धत्वप्रतिपादनमुखेन वि
रोधित्यवच्छेदकनया कार्यमन्यथा प्रतिज्ञावयवादपि तद्बोधापत्तेः स्तत्र प्रागुक्तो न च इत्यत आह। नचेति। यद्यपि

128

हेतेनाकांक्षितलक्षणसिद्धत्वज्ञानमपि नसाद्धाद्धाधादिविरहबोधकं तथात्वेपि निगमनस्य सर्वथैव तदबोधकत्वं
तथापि साध्यपुनर्वचनस्यानुवादतयाप्रयोजननिराकांक्षायांपारिशेष्याद्बाधादिविधूननमेव तदित्यवसीयते तच्चै
वव्युत्पत्तेः तदाहुः उपसंहारस्य सेषमहिमायद्विपरीतत्वं शंकाविध्वापनं नामेति। सिद्धेति। सिद्धं पक्षादितथात्ववद्व्याप्यधू
मवानयमित्यत्र यथाइदं दृष्टान्ते न सिद्धस्य पक्षस्य परामर्शः तथा साध्यांशस्यापि सम्बन्धानापरामर्शो युक्त इत्यर्थः
विरोधवारणायेति। पक्षे साध्याभावस्य साध्याभावव्याप्यस्य वा विरोधिनो निरासायेत्यर्थः। तच्चेति। तथोक्तप्र
त्ययस्य मतभेदेन: अर्थत्रयसंभवादिति भावः। प्रकारे विशेषकधर्मे उपनयस्य तथात्वायमित्याकारकत्वमाश्रित्या
हे। आद्य इति। हेतुमानित्यर्थ इति। उपनयस्य सन्निहितत्वात्तदा तरोपस्थितस्य हेतुमत एव नयेत्यत्र तच्छब्देन
परामर्शसंभवादिति भावः। सामान्येति। यो यो धूमवान् सोऽग्निमानित्युदाहरणोपदर्शितधारणसाध्यव्याप्यवह्निम
दादिपदोपस्थापितस्य पक्षस्य तत्पदेन परामर्शसंभवात्पक्षवृत्तिप्रकारान्वयः पक्षएवेत्यनन्वयइत्यर्थः। यद्यपि
॥१३२॥ पक्षवृत्तिवह्निमत्त्वादिप्रकारकत्वं पक्षेनानन्वितं तथापि तच्चेत्यनेन तत्पदार्थाभिन्नत्वेनैवागतेन तत्पदार्थवृत्तिधर्मा ॥१३०॥
तिदिशास्त्यैव व्युत्पत्तेरिति भावः। अनएवेति। तत्पदस्य पक्षपरत्वेन सोदृश्यस्य तद्गर्भतया चतत्सादृश्यान्वयस्तत्रै

वेत्यनन्वयइत्यर्थः। ननु तत्पदेन दृष्टान्तपरामर्श एवास्तु तथा च तृतीयपक्षे नान्वय इत्यत आह॥ अपेदानुमान इति॥ ।
अत्र पक्षस्यैव दृष्टान्तत्वे नोक्तदोषतादवस्थ्यमित्यर्थः। ननु धर्म्मभेदेप्यवस्थाभेदमादाय साध्यस्वीकारान्नोक्त
दोष इत्यत आह॥ बहूनामिति। अतिप्रसंगादिति। अवयवविपर्यासादावपि योग्यतादिना प्रकृतेत्यर्थान्वयसं
भवेनादोषतापत्तादित्यर्थः। तस्मादिति। न च कृतकत्वादित्येव कथं न क्रियत इति वाच्यं। सर्वनाममहिम्नापूर्वोक्ता
शेषरूपज्ञाने नोपसंहारसिद्धिः। तदुक्तं। सर्वनाम्नो महिमालोच्यं यत्पूर्वोक्तानुसंधानं नामेति भावः। ननुमाध्ये द्विशि
ष्यनिगमनेन। नित्यत्वसिद्धतावगम इत्यत आह अन्यथेति। तद्वैयर्थ्यात् निगमनवैयर्थ्यात्। निगमनेन पक्षविशेष्य
स्यानित्यत्वस्योपसंहारे तद्बाज्ञाद्विरोधिविषक्लत बाधादिनिराकरणं नन्वन्यथेति भावः॥ ॥ हेत्वाभास इति। योगा
दृष्टो धर्म्मवहेत्वाभासपदवाच्य इति तल्लक्षणमाह। अनुमितीति। अनुमितिकारणीभूताभावप्रतियोगिपदेन यस्मिन्स
येनुमित्यभावनियमस्ताहृशज्ञानं विवक्षितं। तेन व्याप्तिवीजत्वादिज्ञानस्य कारणविघटकस्य संग्रहो भवति। अन्यथा
यथाकृते तद्ज्ञानावस्य व्याप्तिज्ञानेन्यानौसिद्धतया अनुमित्यकारणतया तदसंग्रहापत्तेः। कारणपदस्य प्रयोजकत्वपर
वित्रपाधिज्ञानस्य तादृशतया तत्त्रापत्तिर्व्याप्तिः। यथा केतु तत्र न प्रसंगः। उपाधिज्ञानेपि व्याप्तिवारान्नानुमितौ अनुमित्यत्र

129

॥१३८॥

तिबंधात्। ननु व्यभिचारादौ धर्मेति व्याप्तिः। नव हेतुतावच्छिमते सतीति पूरणीयमिति वाच्यं। हेतुतावच्छिमानो हि कादाचित्को वा न तत्काली
नो वा आद्ये व्यभिचारादावपि कदाचित्सत्वेति व्याप्त्यपरिहारात्। अंत्ये साधारणानैकांतिकादावप्यनुमिमानदशायामव्या
प्तिः किंच यथार्थपदेन वह्निव्यभिचारित्वादिभ्रमविषयधूमादौ अतिव्याप्तिवारणेपि समूहालंबनीकृते हेत्वाभासविषय
कतादृशज्ञानविषयेन्यत्र सद्धेतावतिव्याप्तिस्तदवस्थैव। नव तादृशज्ञानेयद्विषयतया त्वेमिति प्रतिबंधकत्वे तद्विषयपद
न विवक्षितमिति वाच्यं। बाधितस्य लिंगस्यासंग्रहापत्तेः। बाधज्ञानस्य पक्षनिष्ठसाध्याभावविषयतयात्तज्ज्ञान प्रमा
त्वविषयतया वा प्रतिबंधकत्वेन लिंगविषयतया अनुमितिप्रतिबंधकत्वात्। ननु बाधाया मपक्षधर्मो हेतुरनैकांतीकावेतिनि
यमात्तत्र व्यभिचारित्वेनैवोक्तलक्षणगमनं स्यादिति चेत्। न। बाधितत्वेनैव स्वरूपेण विभागानुपपत्तेः। न ह्यन्यनरूपेण सामान्य
लक्षणं रूपांतरेण विभागः संभवति। तथा चापि वक्ष्यमाणासंकीर्णबाधस्थले व्याप्तेर्वक्तुं कल्पितत्वात्। नह्यत्रैव तत्रापि व्यभिचारा
दिसंभवः। अपि च असिद्ध्यादिसंकीर्णसत्प्रतिपक्षितत्वेन रूपेण लक्षणगमनेपि सद्धेतौ तत्राव्याप्तिः। तत्र विरुद्धोभयव्याप्यगोच
रसमूहालंबनस्य प्रतिबंधकत्वात्। तस्य च प्रमात्वे नियमात्। न च सद्धेतौ स्वगोचरपरामर्शोत्तरस्य प्रमात्वनियमात्पुरस्कारेणोक्त
लक्षणगमनं स्यादिति वाच्यं। ज्ञाने हि यावद्विषयतया प्रतिबंधकत्वं तावति [illegible] याथार्थ्यं विवक्षितं न वा। आद्ये अपरहेतुविषय
तयापि सद्धेतुगोचरपरामर्शस्यानुमितिप्रतिबंधकतया तदंशे चायथार्थत्वात्। अंत्ये। वह्निव्यभिचारित्वादिभ्रमविषयीभूतधूमा
दौऽतिव्याप्तिस्तदवस्थैव धूमांशेनस्यापि यथार्थत्वात्। न च तस्य धूमविषयतया प्रतिबंधकत्वमेव नेति वाच्यं। किंचिद्वह्निव्याप्ये

अलक्ष्यो वह्निमान् धूमात् स एव वव्याभावान्न्वद्वत्त्वात्।

॥१३८॥

वारीति ज्ञानेप्यनुमितिप्रतिबंधाभावाद्भ्रमविषयत्वेनैव तस्य प्रतिबंधकत्वात्। नवसद्धेतुपरामर्शस्यैवापरहेतुविषयतयाप्रति
बंधकत्वे मानाभावः। तद्विषयकस्य तस्यानुमित्यनुकूलत्वे न तद्विषयत्वेनैव प्रतिबंधकत्वात्। ननु सत्प्रतिपक्षयोर्विरुद्ध
योरन्यतरस्मिन् व्याप्तिपक्षधर्मतान्यतरभंग इति ज्ञानस्यायथार्थस्य तत्र प्रतिबंधकतया नाव्याप्तिरिति चेत्। न। तादृशो
दिज्ञानं न प्रत्येकेण किंतु विरुद्धोभयव्याप्यमुभयमेकत्र न वर्तत इति व्याप्त्यवधारणादनुमितिरूपं तद्वाच्यं। तथा च यत्र वि
रोधद्वयपरामर्शानंतरं विषयांतरसंचारादिना व्याप्तिपक्षधर्मतान्यतरभंगानुमित्यनुकूलो व्याप्त्यादिपरामर्शो न ज्ञात
स्तत्र सत्प्रतिपक्षे व्याप्तिस्त्वादवसत्वे वा। न च तादृशज्ञानाभावे न तत्रानुमित्यप्रतिबंधात्संग्राह्य एव वैनेति वाच्यं। विरुद्धोभयव्या
प्यवत्वपरामर्शस्यैव विरोधिसामग्रीत्वेन प्रतिबंधकत्वात्। न हि व्याप्त्याद्यन्यतरभंगपुरस्कारेण हेत्वाभासत्वं किंतु कदाचि
त्सामग्रीवत्त्वेन तदपि ज्ञानं तत्र भवतीति। अन्यथा न स्यात् कारणविघटकतापत्तौ बाधप्रतिरोधयोः साक्षादनुमितिप्रतिबं
धकत्वमिति सिद्धांतो व्याकुप्येत। किंच यत्र विरुद्धसमीचीनं लिंगद्वयं विरोधपरामर्शेण सत्प्रतिपक्षितं न तत्र न तज्ज्ञानस्याप्ययथा
र्थत्वे नाव्याप्तिर्वज्रलेपैव। यत्तु व्याप्तिपक्षधर्मतान्यतरभंगाद्यनुमानेन न प्रतिबंधकत्वं किंतु साध्यासाधकाविमाविति ज्ञा
नसत्प्रतिपक्षेनुमितिप्रतिबंधकं न त्वयथार्थमेवेति नाव्याप्तिः। अन्यथा असाधकतानुमितिवैयर्थ्यापत्तेरिति। तच्चुच्छं।।सा
ध्याधसाधकत्वं साध्यसाधकत्वं न त्वयथार्थमेवेति नाव्याप्तिः। सिद्ध्यजनकत्वं अनुमितिप्रतिबंधकतानवच्छेदकरूपवत्त्वं वा तन्न

130

१३१

ज्ञानत्वेन साक्षादनुमितिप्रतिबंधकं। बाधवदनुमितिविरोध्यनवगाहनात्। नाप्यधिकरणविघटकं व्यभिचारादिज्ञानवत्परामर्शवि
षयस्याभावानवगाहनात्। अन्यथासाधूकत्वस्य व्यभिचारादिवद्धेत्वाभासोपाध्यंतरापत्तेः। असाधकतानुमानेन चानु
मितिप्रतिबंधार्थं किंतु तदप्युद्देश्यमित्यपि स्फुटमिति। किं वानुमितिप्रतिबंधकयथार्थज्ञानविषयत्वं विशेषणमुपलक्षणं
वा नाद्यः। अज्ञायमानेऽनित्यदोषे विरुद्धादावव्याप्तिप्रसंगात्। न चेतदसंग्राह्यमेवेति वाच्यं। साध्यव्यापकाभावप्रतियो
गित्वादेर्विशेषलक्षणस्य तदापि तत्र सत्त्वेन संग्राह्यत्वात्। अन्यथाविशेषलक्षणानां तदातिव्यापकतापत्तेः। नापि द्वितीयः।
सद्धेतावसाधारणसत्प्रतिपक्षत्वविशेषादर्शनदशायां तादृशज्ञानविषयत्वाद्वेदर्शनदशायामपि हेत्वाभासतापत्तेः
अपि च यत्किंचिद्रूपीयतादृशज्ञानविषयत्वं यस्य तस्य तत्प्रति हेत्वाभासत्वमन्यं प्रत्यपि वा आद्ये एकपुरुषेण निरूढादिविशे
षानित्यदोषत्वेनानगृहीतस्तं प्रति तस्य हेत्वाभासतानापत्तेः। द्वितीये विशेषादर्शनदशायामेकपुरुषं प्रति कृते न कृत्वादिहेतोर्हे
त्वाभासत्वे विशेषदर्शनवतः पुंसोऽन्यस्यापि हेत्वाभासतापत्तेरिति॥ ॥ अत्रोच्यते॥ ॥ अनुमितिप्रतिबंधकपदेन ज्ञानस्यानु
मितिप्रतिबंधकतावच्छेदकाः सव्यभिचारत्वादयस्तेऽपायेयो विवक्षिताः॥ अनुमितिप्रतिबंधकतावच्छेदकत्वं तु लिंगान्यत्वे सत्य
नुमितिप्रतिबंधकज्ञानविषयतापर्याप्त्यवच्छेदकत्वमेव विवक्षितं। तद्वत्त्वगोचरयथार्थज्ञानविषयत्वं हेत्वाभासत्वमित्यर्थः।
विषयत्वं च विशेष्यत्वमतो व्यभिचारादौ धर्मे नातिव्याप्तिः। तद्वत्त्वगोचरत्वं तात्कालिकतद्वत्त्वगोचरत्वं तेन पाकरक्ते घटे श्यामो यमि

॥१३१॥

तिधीयथार्थत्ववत्कादाचित्कसंबंधपुरस्कारेण सत्प्रतिपक्षितत्वबुद्धेर्यथार्थत्वेन सत्प्रतिपक्षितत्वोत्तीर्णे सद्धेतौ नातिव्या
प्तिः। न चैवं यथार्थपदवैयर्थ्यं तात्कालिकतद्धेतुगोचरत्वविरहादेव सद्धेतावनतिप्रसंगादिति वाच्यं। तद्धेतुत्वे हि न तद्विषयवि
शेषणं किंतु ज्ञानविशेषणं तथा च वेदानीं वह्निव्याप्तिवानिति तो धूम इति भ्रममादाय अतिप्रसंगतादवस्थ्यात्। तादृशज्ञा
नविशेष्यत्वस्य च विशेषणमेवमेव न चाज्ञायमानदशायां नित्यदोषेऽव्याप्तिरिति वाच्यं। तत्र स्वरूपसत्त्वेन तस्यैव तदानीं तद्धेतुदिदं
लिंगमित्याकारकस्य तदापि सत्त्वात्। न चैकपुरुषीयसत्प्रतिपक्षतादशायां कृतकत्वादिहेतोः पुरुषांतरं प्रति सद्धेति
पक्षतापत्तिः। आपादकाभावात्। नहि तादृशज्ञानविषयः सर्वपुरुषं प्रति हेत्वाभास इति लक्षणार्थः। किंतु तादृशज्ञान
विषयो हेत्वाभास इत्येव तावतैव हेतुतदाभासविवेकोपपत्तेः। तत्पुरुषीयसत्प्रतिपक्षतायां तत्पुरुषीयसमानवलोप
स्थित्या प्रतिरुद्धतत्पुरुषीयानुमितिरूपकार्यलिंगत्वं प्रयोजकमिति न तदापत्तिः॥ एवं च सद्धेतावसाधारणेति सामान्यत
इष्टापत्तेः॥ विशिष्टापादकाभावात्। नैव समूहालंबनीये तैकदेशाभासविषयकतादृशज्ञानविशेष्ये अन्यत्र सद्धेताव
तिव्याप्तिः॥ तदंशे तद्धेतुप्रकारकयथार्थज्ञानविशेष्यत्वस्य विवक्षितत्वात्। बाधितमिदमिति ज्ञानस्य यथार्थस्य विशेष्यतो
त् बाधिते लिंगेनाव्याप्तिः। न च तथापि सत्प्रतिपक्षेऽव्याप्तिरेव विरोधिपरामर्शविषयीभूतस्य प्रतिसाधनस्यैव दोषता
त्। स्थापनाहेतौ च तत्संबंधाभावेन तद्धेतुगोचरयथार्थज्ञानाभावादिति वाच्यं। इदं लिंगमनेन सत्प्रतिपक्षेण सत्प्रक्षित

131

यत्र क्रमेण परामर्शद्वयं तत्र विशिष्टज्ञानसंबंधाभावात् स्वरूपसंबंधः । प्रतिपक्षविषयविशेषणपरामर्शस्येत्यर्थः । तद्वत्त्व । हेत्वाभासत्वे । छिं... अयमनापेक्ष्यादि द्वितीयपक्षविषयत्वे न ...

त्वमिति ज्ञानस्य यथार्थत्वेन सकलसिद्धतया ज्ञानस्वरूपसंबंधस्य स्वरूपसंबंधविशेषस्य वा कल्प्यत्वात् । तत्संबंधेन ज्ञानस्यापि य-
थार्थत्वात् । अत एव तत्संबंधस्यानित्यत्वाद् अनित्यदोषत्वं । न चैवं धूमो वह्निव्यभिचारीति ज्ञानसंबंधमादाय धूमेऽपि व्यभिचारित्वस-
त्त्वादिति व्याप्तिः स्यादिति वाच्यं । तज्ज्ञानस्य यथार्थत्वेन सकलसिद्धतया तत्र तत्संबंधत्वाकल्पनात् । न च संबंधीभूतज्ञानस्यैवा-
नुमितिप्रतिबंधकतया तत्संबंधगोचरज्ञानस्यानुमित्यप्रतिबंधकत्वमिति वाच्यं । इष्टापत्तेः । न ह्यनुमितिप्रतिबंधकीभूततत्ता-
दृशज्ञानविशेष्यत्वमात्रं तंत्रं । किंतु तद्वत्त्वगोचरयथार्थज्ञानविशेष्यत्वमात्रं तच्च ज्ञानं व्यभिचारित्वादिगोचरमपि प्रतिबंधकमि-
त्यन्यदेतत् । अन्यथा बाधितेप्यव्याप्त्यापत्तेः । न हि लिंगविशेष्यकबाधितत्वादिज्ञानस्यानुमितिप्रतिबंधकत्वं किंतु बाधमात्रविष-
यस्यैव । तद्विषयतया विरोधाभावादित्यलं । ननु याथार्थ्यस्य विषयघटिततया विषयविशेषणीभूतमपि तद्वत्त्वं ल धर्मैव तु
तथा च व्यर्थविशेषणत्वमित्यापरितोषात्तद्वत्त्वरूपं लक्षणं करोति ॥ यद्विषयत्वेनेति ॥ ज्ञायमानमिति । न च व्यर्थत्वं तत्रापि ... । विष-
यीभूतस्य व्यभिचारादेर्न प्रतिबंधकत्वं किंतु तज्ज्ञानस्यैवेत्यपरितोषाद्द्वितीयं लक्षणं मंतव्यं । अनेन व्यभिचारादयस्तु । धूमो-
ल्लक्षिताः तद्विषयत्वेनैव च लिंगज्ञानस्यानुमितिप्रतिबंधकत्वात् । अत्र च लक्षणद्वये तत्त्वमित्यत्र तत्पदस्य तद्वत्त्वपरत्वेन तद्वत्त्वमित्यर्थः ॥
तेन व्यभिचारादौ धर्मे नातिव्याप्तिः । धर्मिणि च लिंगे नासंभवः । न च पक्षताविरहरूपायाः ज्ञानविरहरूपाया वा सिद्धेर्न संग्रह इति वाच्यं
इष्टापत्तेः । ज्ञायमानदोषस्यैवात्र हेत्वाभासत्वेन लक्ष्यत्वात् । न वा ज्ञानादिदोषो ज्ञायमानः अनुमितिप्रतिबंधकः । कारणाभावत्वेन
स्वरूपसत एव प्रतिबंधकत्वात् । न चैवं संदिग्धासिद्ध्यादिकं कथं नोद्भाव्यं अज्ञायमानदोषतया हेत्वाभासत्वाभावात् । नित्य

॥१४०॥

॥१४

हस्थानांतरत्वाभावादिति वाच्यं। हेत्वाभासाश्च यथोक्ता इति सूत्रेऽनुक्तसमुच्चयार्थेन चकारेण तस्यापि निग्रहस्थानत्वप्रतिपादनात्॥
सिद्धसाधनस्य पक्षताविरहपर्यवसन्नस्यार्थान्तरत्वेनैवोद्भावनमिति सर्वमवदातं॥ नन्वेतल्लक्षणं सद्धेतौ सत्प्रतिपक्षेऽसाधारणे वा
व्याप्तौ व्याप्तस्य पक्षधर्मतया तस्यानुमित्यनुकूलतया नानुमितिप्रतिबंधककतावच्छेदकत्वाभिमतसत्प्रतिपक्षितत्वादेरभावादित्यत
आह। द्वयोति। तथा च तत्काले तल्लीनस्यानुमितिप्रतिबंधकत्वादनुमितिप्रतिबंधकतावच्छेदकस्य सत्प्रतिपक्षितत्वस्यासाधारणत्व-
स्य चाभावान्न तत्राव्याप्तिरिति भावः। यद्यपीति। अत्र सत्प्रतिपक्षपदं विरोधिज्ञानसामग्रीपरं तत्त्वेनैव सत्प्रतिपक्षस्य प्रतिबंध-
कत्वात्। ननु सत्प्रतिपक्षहेत्वाभासपरं तस्य प्रत्यक्षेऽसत्त्वादिति द्रष्टव्यं। तथापीति। न ह्यनुमित्यसाधारणदोषत्वेनात्र लक्ष्य-
ता किन्तु ज्ञायमानदोषत्वेनेत्यर्थः। अनुमित्यसाधारणदोषत्वमपि बाधसत्प्रतिपक्षयोरित्याह। यद्वेति। बाधेनेत्युपलक्षणं स-
त्प्रतिपक्षेणेत्यपि द्रष्टव्यं। प्रत्यक्षे प्रत्यक्षबाधत्वेन तत्सामग्रीत्वेन च प्रतिबंधकत्वात्। अपीति। तत्त्वानुमतावपिशब्दे पीत्यप्रत्यक्षा-
दयात्। अनुमितौ बाधमात्रस्यैव प्रतिबंधकत्वं तथा च बाधेनेत्यत्र बाधमात्रेणेत्यर्थो द्रष्टव्यः। ननु मा भूदपि बाधस्यैव प्रतिबं-
धकत्वं अन्योन्याभावज्ञानमात्रस्यैव प्रतिबंधकत्वादिति चेत्। अत्यंतासत्यपि ह्यर्थे ज्ञानं शब्दः करोति हीति सिद्धान्तानुसारेण त-
त्प्रतिबंधकत्वमनंगीकृत्यैवास्याभिधानात्। न चास्मत्सिद्धान्तेऽपि न बाधमात्रस्य शाब्दप्रतिबंधकत्वं नरशिरः शृङ्गवानुमानेन तदभावबो-
धकागमस्य बाधापत्तेरिति वाच्यं। उपजीव्यज्ञातीयत्वेन शब्दस्य बलवत्त्वात्। ज्ञानदशायां विरोधात्तद्विरोधेनानुमानस्यैव बाधितत्वा-
त्। अत एवागमबाधितोदाहरणमिदमेवाग्रे। तदुक्तत्वात् ज्ञानदशायां विरोधादर्शनवतः समुत्पन्नायां वानुमित्यां शाब्दबाधापत्तेरि-

132

कुं

ष्टत्वादिति। ननु गौरवज्ञानस्य गुर्वर्थ्येनुमितिप्रतिबंधकत्वे गौरवस्यापि व्यभिचारादिवत् दोषाभासतोपाधिवन्मस्तु न वा हेतुविषयतयाऽतज्ज्ञान
स्याप्रतिबंधकत्वेऽन्यथा तथात्वमिति वाच्यं। बाधस्याप्येतथात्वापत्तेः। न हि तज्ज्ञानमपि हेतुविषयतयाऽप्रतिबंधकमित्यत्रानुमितिविरोधि। न।
यतो हि नेदृशस्यैव स्य मनुमितिप्रतिबंधेः तस्यैव तथात्वे नापि मतत्वे। न च गौरवं तथा फलमुखगौरवादेः प्रमाणसिद्धत्वात् तज्ज्ञा
नस्याप्रतिबंधकत्वादिति। तच्च पंचरूपोपाधिभिन्नविभाज्यं तत्-इत्याह। केवलेति।। सव्यभिचारोऽपीति। यद्यपि सामान्यलक्षणानंतरं वि
भागो युक्तः अन्यथाऽप्राप्तकालतापत्तेः। तथाप्यनुपसंहारीन व्यभिचारित्वं तर्भूतः किं च सिद्धान्तर्भूतत्वेऽपि तदितिके पांविनातंतं तथाप्यत्वतत्सो
धारणेन सव्यभिचारलक्षणमनुक्तमिति शंकामपनेतुं तदंतर्भूततत्त्वप्रदर्शनपरतया मेतस्यानंतरं तु विभागे नास्य पर्यमिति भा
वः। प्रसंजकत्वं साधकत्वं मापादकत्वं वा तत्त्वं तदुविरुद्धत्वेनायं प्रत्येकस्य न संभवतीत्याह। एतस्येति। नाप्युभयपक्षेति साध्यव
तत्साध्याभाववद्वृत्तिपक्षद्वयं अनुपसंहारिणि पक्ष एव तद्वेति भाव।। तत्रायेति। अत्र सर्वेति विशेषणं। तेन धूमादौ नातिव्याप्तिः। अ
यथेति। साध्यसंदेहजनककोटिद्वयोपस्थितिः साध्यतदभावोपस्थितिः। तदुक्तं नकयुत्पक्षधर्मताज्ञानं तद्विषये वेसतीयर्थः। ननु प
क्षधर्मतेति व्यर्थमिति चेन्न। साध्यसंदेहजनकप्रामाण्यसंशयात्मककोटिद्वयोपस्थितिजनकज्ञानविषयीभूतेज्ञाने व्य
भिचारवारकत्वात्। पक्षधर्मताज्ञानेन साध्यसंशयविषयत्वेऽपि तज्ज्ञानं। न च ज्ञानत्वस्य साध्यसंशयविषयपर्वतादिघटितज्ञा
ज्ञानं प्रामाण्यसंशयात्मककोटिद्वयोपस्थितिजनकं किंतु ज्ञानत्वेऽपि तज्ज्ञानमेवेति भवति तद्व्युदासः। ननु सर्वं ज्ञानं निर्विषयं
ज्ञानत्वाद्यनुमितिप्रामाण्यसंशयजनकज्ञानविषयज्ञानत्वेतथाप्यतिव्याप्तिः। तत्र संशयविषयीभूतज्ञानघटिताज्ञानस्यैव

।१९४९।। ।।१९४९।।

रूपसपक्षव्याप्रत्तेत्वेन=६

मिति दृष्टान्ते ज्ञानत्व ज्ञानस्य प्रकृतसाध्यसंशयधर्मिकत्वप्रकारकज्ञाने तेन साध्यसंशयजनकप्रामाण्याप्रामाण्यकोटिद्वयोपस्थितिजनकत्वे घटत्वरूप
साध्यसाध्यसंशयविषयो योऽयं घटत्वादित्वप्रकारकज्ञानत्वरूपकारणतावच्छेदकाभावे न घटज्ञानत्वं ज्ञानं न घटज्ञाने प्रामाण्यसंशयजननं न यदि स्यात् =

तथात्वादिति चेत् न । न हि तत्र ज्ञानस्य निर्विषयत्वरूपसाध्यसंशयविषयप्रवृत्तिता ज्ञानत्वेन प्रामाण्यसंशयात्मकोभयकोटिद्वयोपस्थि-
तिजनकत्वं किन्तु प्रामाण्यसंशयविषयत्वेन निर्विषयत्वानुमितिदृष्टान्ते ज्ञानत्वेनैव अन्यथा घटादिज्ञाने प्रामाण्यसंशयो
न स्यात् । ज्ञानत्वस्य घटादिवृत्तिता ज्ञानविरहात् । ननु व्यभिचारित्वादिभ्रमविषयीभूते सद्धेतावतिव्याप्तिः । न च हेतुत्वाभिमतपदेन हेत्वा-
भासपरेण तद्व्युदासः । अपक्षधर्मधूमेण वह्निज्ञानभ्रमविषये तथात्वप्रतिव्याप्तेः । न च तादृशज्ञानकोटिद्वयोपस्थापकप्रमाविषयत्वेनैव नातिप्रसं-
गः हेतुत्वाभिमतपदवैयर्थ्यापत्तेः ॥ मैवं ॥ हेतुत्वाभिमतपदस्य साध्याव्याप्यत्वपरत्वादिति चेत् । तन्न । व्यभिचारित्वादिभ्रमविषयी-
भूते विरुद्धे तथात्वप्रतिव्याप्तिरेव । न च विरुद्धोऽप्यनेन रूपेणासाधारण इति ग्रन्थकृतोपयोगाभिधानात् तस्य लक्ष्यत्वमेवेति वाच्यं । पक्ष-
धर्मतापदवैयर्थ्यापत्तेः । निर्विषयतादौ साध्ये ज्ञानत्वस्यैव विरुद्धत्वेन लक्ष्यत्वात् तद्वारणार्थं तस्यानभिमतत्वात् । सविषयत्वादौ सा-
ध्ये न विरुद्धत्वमिति चेत् न । तत्र साध्ये तस्य सद्धेतुत्वेन साध्याव्याप्यपदेनैव वारणात् । न च विशेषणज्ञानजन्यत्वादौ साध्ये तस्मिन्नेव हेता-
वतिव्याप्तिः । तत्र तस्य व्यभिचारित्वेन संग्राह्यत्वात् । अन्यादृशस्य च साध्यस्याभावात् तस्माद्यदि विरुद्धस्यासंग्राह्यत्वं तदा व्यभिचा-
रितत्वभ्रमविषयीभूते विरुद्धेऽतिव्याप्तिः । यदि च तस्य संग्राह्यत्वं तदा पक्षधर्मतापदवैयर्थ्यमेवेति । चिन्त्यं ॥ वयं तु ब्रूमः ॥ ज्ञान-
पदं प्रमापरमेव यद्विषयत्वेन कोटिद्वयोपस्थापकत्वं तदंशे प्रमात्वं बोध्यं तेन स्वरूपासिद्धिसंकीर्णे नातिव्याप्तिः । विरुद्धे वा स ग्राह्य
मेवेति पक्षधर्मतापदं सार्थकं तादृशज्ञानसंशयामेवात्र लक्ष्यत्वमिति तदभाववद्ग्राह्यं नो व्याप्तिः । न च हेत्वभिमतपदवैयर्थ्यं ।

133

तेन व्यभिचरितत्वभ्रमविषये विरुद्धे नातिव्याप्तिः = निर्विषयत्वसाध्यकं = गगने =

तस्य साध्याव्याप्यत्वपरस्य सद्धेतुसाधारणातिव्याप्तिवारकत्वात् केवलान्वयी साध्यग्निमद्धूमे न तस्यात्र लक्ष्यत्वेन प्रतिपा
दनादिति। ननु सद्धेतावसाधारणे साध्यव्याप्यत्वस्याभावादव्याप्तिः। केवलान्वयिसाध्यकेनुपसंहारिणि वाव्याप्तिरि
त्यत आह। केवलेति। विशेषलक्षणस्यापि तद्व्यावृत्तस्यैव बोध्यत्वादिति भावः। यद्यप्यस्य संग्राह्यत्वेपि न दोषः तत्र लक्षण
वारणाय विशेषणमप्यनर्थकं तथापि सद्धेतुर्न कदापि हेत्वाभास इति मतमाश्रित्यैतदुक्तं। अत इति। यतः पुरुषदोषानव
स्तु दोषः इत्यर्थः। प्रमेयत्वेनेति। अयं घट एतद्घटान्यः प्रमेयत्वादित्यत्रेत्यर्थः। तयोरिति। साध्ये नस्य साध्यसंदेहवारक
त्वादिलक्षणानुसारेणैतदुक्तं बोध्यं। साध्यवद्वृत्तित्वेन निश्चितसाध्यवदवृत्तित्वेनेत्यर्थः। पक्षे साध्यस्य संदिग्धत्वादि
तिभावः। यस्य यदा तादृशज्ञानविषयत्वं तदा तस्य व्याप्तित्वादित्वमिति मतानुसारेणैतदुक्तं बोध्यं। अन्यथा दृशा विशेष
स्यापि तादृशज्ञानविषयतया सौत्राणयकत्वेनातिव्याप्तिप्रसंगात् तथा च तादृशायामस्यापि संग्राह्यत्वमेवेति भावः। एत
॥१४२॥ दृशानेपीति। न च साध्याधारणताग्रहज्ञाने एतल्लीनस्याप्यनुमितिप्रतिबंधकत्वाद्विनिगमकाभाव इति वाच्यं। एतल्लीनस्या
विरोधिविषयत्वेनाप्रतिबंधकत्वात्। अत एव हेत्वाभासत्वादिज्ञानमपि नानुमितिप्रतिबंधकं विरोध्यविषयत्वात्। तल्लीने
न व्यभिचरित्वादिसंदेहापादनेनस्यैव प्रतिबंधकत्वमिति भावः। एतेन पक्षवृत्तित्वे सतीति। अत्र विरुद्धान्यत्वमपीति वि
शेषणं। तथा च विरुद्धान्यस्य पक्षवृत्तेर्येनुमितिविरोधीयोनुमितिपरंपराविरोधीकरणविघटक इति यावत्। तेन सा

॥१४२॥

धारणत्वादिकं लक्ष्यते तत्संबंधाव्यावृत्तिर्विद्यमानतत्संबंधवत्त्वं दूरस्यार्थः। तेन स्वरूपासिद्धिसंकीर्णव्यभिचारिण्यव्या
प्तिः विरुद्धे चातिव्याप्तिः। विरुद्धान्यत्वविशेषणे विरुद्धसंकीर्णासाधारणाव्याप्तिः। बाधितत्वसत्प्रतिपक्षितत्वयोरपि अनु
मितिविरुद्धत्वात्। बाधसत्प्रतिपक्षयोरतिव्याप्तिः कदाचित्कसंबंधमादायासाधारणोत्तीर्णसद्धेतौ चातिव्याप्तिरित्येता
नि दूषणानि निरस्तानि वेदितव्यानि। स्वरूपासिद्धसंकीर्णेपि साधारणत्वादेः तादृशस्य संभवात्। अन्यथा लक्ष्यता
नूः विरुद्धान्यस्येति विशेषणाद्विरुद्धे नातिव्याप्तिः विरुद्धान्यस्यपक्षवृत्तेरनुमितिविरोधिसपक्षव्यावृत्तत्वेनस्य विरुद्धेस
कीर्णासाधारणोपि सत्त्वान्नाव्याप्तिः। बाधितत्वसत्प्रतिपक्षयोस्तु परस्पराविरोधित्वाभावान्नातिव्याप्तिः। अव्यावृत्तिप
देर्महिम्नासंबंधस्य विद्यमानताभासिद्धतावसाधारणातोत्तीर्णेतिव्याप्तिवारणात्। ननु व्य२र्थविशेषणनीव्यु
मादौ विरुद्धान्यपक्षवृत्तेरनुमितिविरोधिव्याप्यत्वासिद्धत्वं तत्संबंधस्य तत्र विद्यमानत्वादतिव्याप्तिरिति चेन्न। व्यर्थ
विशेषणान्यत्वस्यापि विशेषणीयत्वात्। अनुमितिविरोधित्वं च अनुमितिप्रतिबंधकज्ञानविषयतावच्छेदकत्वमनोनी
ज्ञानरूपासिद्धावतिप्रसंग इति॥ विरुद्धापीति॥ नचैवं विरुद्धान्यस्येति विशेषणं व्यर्थमिति वाच्यं। अनेन रूपेणोत्यपित्या
ना तु उक्तरूपत्रयान्यतमवगम एव विरुद्धस्य लक्ष्यत्वात्। तथा च सपक्षविपक्षव्यावृत्तत्वादित्यागायामेव विरुद्धस्यासा
धारणत्वेन संग्राह्यत्वं न तु विरुद्धत्वेन निश्चयदशायामुक्तरूपत्रयाभावात्। तथा च तदानद्यावर्त्तनाय सार्थकमेव तत्
द्धिति। साध्यव्याप्यत्वसत्तीति। साध्यव्याप्यत्वसाध्याभावव्याप्यत्वोभयनिश्चयविरोधिहेत्वाभासतोपाधिमत्वं वै यर्थः।
साध्यवन्मात्रवृत्तित्वनिश्चयसाध्याभाववन्मात्रवृत्तित्वनिश्चयविरोधिहेत्वाभासतोपाधिमत्वं

प्रथममिति। स व्याप्तिवृत्तित्वादिग्रहं विना हेत्वाभासत्वाग्रहादित्यर्थः। यद्यपि तद्ग्रहेऽपि शब्दादिना हेत्वाभासत्वं गृहीतुं श-
क्यत एव तथापि स न सार्वत्रिक इत्यर्थः। यथाश्रुते सद्धेतावसाधारण्ये व्याप्तिरिति। यथोक्तस्य वाच्यत्वे व्याप्तिश्च। केवला-
स्ति। सपक्षविपक्षव्यावृत्तत्वस्वरूपहेत्वाभासत्वोपाधेरूप्यनिश्चयविरोधिनस्तत्रापि सत्त्वादित्यपरितोषादाह। केचिदिति॥
अयोगोलकादिसपक्षव्यावृत्तेर्नैव धूमादावप्रतीयत उक्तेः सर्वेति सपक्षविशेषणं। नापि पक्षवृत्तित्व इति। विरुद्धान्यपक्ष-
वृत्तौ यदनुमित्यौपयिकव्याप्त्यादिसंबंधज्ञजन्यत्वं तद्वत्त्वमित्यर्थः। तेन न स्वरूपासिद्ध्यादिसंकीर्णव्याप्तिः। अनुमित्यौ-
पयिकत्वं तु अनुमितिकारणलिंगपरामर्शविषयतावच्छेदकत्वं यातो बाधितत्वासत्प्रतिपक्षितत्वरूपानुमित्यौप-
यिकसंबंधज्ञजन्यत्वात् बाधितसत्प्रतिपक्षयोरप्रसंगः। न चैवं विरुद्धस्वरूपासिद्धे चातिव्याप्तिः। स्वरूपा-
सिद्धविरुद्धेऽनुमित्यौपयिकसंबंधज्ञजन्यत्वं स्वरूपासिद्धत्वं विरुद्धत्वं वा। न च तदुभयं विरुद्धान्यपक्षवृत्तौ वर्त्ते-
ते प्रथमस्यापक्षधर्मे द्वितीयस्य विरुद्ध एव वृत्तेरिति। उभयेति। ननु शब्दो नित्यः शब्दत्वादित्यादौ शब्दादिना व्याप्ति-
ग्रहदशायामतिव्याप्तमिति चेत्। न। तद्व्याप्तिनिश्चयस्य पक्षीयसाध्यगोचरतानियमेन तदा पक्षस्यैव सपक्षतया
सकेवलसपक्षविपक्षव्यावृत्तत्वरूपोऽज्ञायको हेतूपस्थापकतावच्छेदकरूपवत्त्वस्य तत्राभावात्। विशेषादर्शन-
सहितस्यैव तस्याज्ञायको हेतूपस्थापकतावच्छेदकत्वेन विवक्षितत्वादिति। ननु केवलान्वयिसाध्यकेऽनुपसंहारि-
ण्यव्याप्तिः। तत्र साध्याभावकोटेरप्रसिद्धिरिति चेत्। न। तस्यालक्ष्यत्वात् व्याप्तिनिश्चयविरोधिसंदेहजनकको-

यद्विषयतया ज्ञानस्यानुमितिप्रतिबंधकत्वमिति लक्षणानुरोधेनेत्यर्थः॥१८

द्युपस्थितेर्विवक्षितत्वाद्वा। तादृशाश्च साध्यतदभावसंशयः साध्ये पक्षवृत्तित्वसंशयश्च भवतीति भावः। अथ यमिच्छा
वीनु ज्ञानादि यत्र प्रामाण्याप्रामाण्यप्रकारोपनयको द्युपस्थितिजनकतावच्छेदकज्ञानत्ववति सद्धेतौ ज्ञानेति व्याप्तिरिति चेन्न।
छिन्न निरुक्तया व्याप्तिज्ञानमुपनयको द्युपस्थितिजनकतेद्धत्वस्यावच्छेदकरूपवत्त्वेन विवक्षितत्वात्। ज्ञानत्वं तु प्रामाण्यसंशयवि
षयधर्मिवृत्तित्वेन ज्ञातं तथापर्वतो वह्निमान् धूमादित्सात्याद्यनुमितिवृत्तितया ज्ञातस्यापि ज्ञानत्वस्य च वह्नितदभा
वसंशयजनकप्रामाण्याप्रामाण्यसंशयात्मकोपनयको द्युपस्थापकत्वात्। अन्यथा धूमवृत्तितया तस्या ज्ञानात् तथात्वत
स्य न स्यादिति। प्रामाण्याविशेष्यकसाध्यतदभावको द्युपस्थापकतावच्छेदकरूपवत्त्वे वा तात्पर्यमतो न ज्ञानेति व्या
दि। विरुद्धान्यपक्षवृत्तित्वे सतीति। एतच्च लक्षणं पक्षवृत्तित्वे सती। यदि पूर्वपक्षोक्तलक्षणव्याख्यानेनैव व्याख्यातमि
ति बोध्यं। लक्षणानुरोधेनेति। साध्यवन्मात्रेति। ननु सद्धेतुसंकीर्णो विरुद्धसंकीर्णो वा साध्यं धारणेऽव्याप्तिः। प्रथमस्य सा
ध्यवन्मात्रवृत्तित्वात्। द्वितीयस्य साध्याभाववन्मात्रवृत्तित्वात्। न च साध्यवत्पदं निश्चितसाध्यवन्मात्रपरं साध्या
भाववत्पदं च निश्चितसाध्याभाववत्परं। अनुपसंहार्यव्याप्तेः। सद्धेतुदशायां धूमेऽतिव्याप्तेश्चेति। प्रथमे निश्चितसाध्यवतो
ऽप्रसिद्धेः प्रमेयमात्रस्यैव पक्षत्वेन संदिग्धसाध्यकत्वात्। द्वितीये अनिश्चितसाध्यवत्यपि पक्षे धूमस्य वृत्तेः। अत एव तदुभ
यत्वपदं पक्षातिरिक्ततदुभयपरमपि न। न च साध्यवन्मात्रवृत्तित्वेनानिश्चितत्वे सति साध्याभाववन्मात्रवृत्तित्वेनानि
श्चितत्वेन हेत्वाभासत्वेन विशेषणान्ना ज्ञायमाने धूमे व्यतिरेकव्याप्तिमात्रवत्तया ज्ञायमाने वा तत्रातिव्याप्तिरिति वाच्यं।

नु॰अ॰

१५५॥

व्यतिरेकव्याप्तिमत्त्वपारप्रमाणेहेतौतेनतरेणासत्प्रतिपक्षितेधूमेतत्तथात्वप्रतिव्याप्तेः। ॐ छद्दुदादोपक्षेस्वरूपासिद्धतयाहेत्वाभा
सज्ञायमानेधूमेतिव्याप्तेश्च। अथासाधारण्याभावकोऽवच्छिन्नसाध्यव्याप्तत्वाभावेसतितत्कावच्छिन्नविरुद्धत्वा
भावववत्त्वमुक्तलक्षणार्थो विवक्षितः साध्यव्याप्तोविरुद्धोवासाधारण्यदशायांतद्भावेकाऽवच्छिन्नसाध्यव्याप्त
त्वविरुद्धत्वाभावान्नाव्याप्तिरितिचेन्न। असाधारण्यदिनपुरुषीयनत्साध्यीयपक्षिविपुरुषीयपक्षिविसाध्यीयवात्र
विवक्षितेआद्येयसाध्यविशेषमादाययस्यपुरुषस्यासाधारण्यंकदापिनावतीर्णंतत्साध्यकसाधारणेसर्वेवाव्या
प्तेः। अन्यथापक्षिविपुरुषीयपक्षिविसाध्यकासाधारण्यदशायांतदेवासाधारण्यमादायविशिष्टाभावसत्त्वेनस
हेतुत्वदशायांत्रावद्वादावतिव्याप्तेः॥ ॥अत्रोच्यते॥ ॥साध्यवन्मात्रवृत्तित्वसाध्याभाववन्मात्रवृत्तित्वोभयनिश्च
यविरोधिहेत्वाभासत्वोपाधिमत्त्वमत्रविवक्षितं। तादृशश्चोपाधिःसपक्षविपक्षगामित्वमनुपसंहारित्वंअसाधारणत्वंच
यद्यपिअसाधारणस्यसत्प्रतिपक्षोत्थापकतयादूषणपदेव्याप्तिनिश्चयविरोधित्वंनास्ति। तथापिसाध्यवन्मात्रवृत्ति
त्वादिनिश्चयविरोधित्वमस्त्येवव्यतिरेकव्याप्तिपुरस्कारेणैतस्यसत्प्रतिपक्षोत्थापकत्वात्। केवलान्वयिसाध्यको
अनुपसंहारीसंग्राह्यएवनोस्मिन्पक्षइतिनतत्राव्याप्तिः। तत्संग्राहकतापक्षेतुसाध्यवन्मात्रवृत्तित्वनिश्चयपदेनसा
ध्येनिष्ठहेतुसमानाधिकरणात्यन्ताभावाप्रतियोगित्वनिश्चयश्चविवक्षितइतिध्येयं। केवलान्वयिसाध्यके
साध्याभाववन्मात्रवृत्तित्वनिश्चयपदेनसाध्यनिष्ठहेतुव्यापकाभावप्रतियोगित्वनिश्चयश्चविवक्षितइतिध्येयं। केवि

॥१५५॥

तुकेवलान्वयिसाध्यकोऽनुपसंहारी सद्धेतुरसाधारणो विरुद्धसंकीर्णः। साधारणश्चायं मते न संग्राह्यस्तन्मते नेदं लक्षणं
हेत्विमत्वेन विरोषणान्नाथवा वृत्तिप्रसंगः स्यात्। ननु विरुद्धोप्यनेन रूपेणासाधारण एतेनि साध्यकृतागोपि धीनाते।
नुक्तलक्षणानां तत्राव्याप्तिरिति चेत्। न। न हि विरुद्धोपि साधारणानैकान्तिक इति तदर्थोपि तु साधारणयोर्दूषणत्वोपाधि:
सत्त्वात्प्रसक्तीति विरुद्धस्यापि तद्धेत्वे नज्ञायमानस्यानुमितिप्रतिबन्धकत्वमिति साधारणविभाजकत्वोपाधिः सपक्षविपक्ष
गामित्वमिति न तस्य साधारणत्वे किंतु सर्वदा विरुद्धत्वमेव। कदाचिद्विरुद्धत्वप्रयोजकोपाधिमत्तया ज्ञातस्यानुमितिप्रति
